Digitized by Madhuban Trust

DHATURATNAKARA

धातुरत्नाकरः

BY

MUNILAVANYA VIJAYA SURI

मुनिलावण्यविजय सूरिविनिर्मित :

VOL. VII

BHAVAKARMA

सप्तमो भाग : भावकर्म प्रक्रिया

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

DHATURATNAKARA धातुरत्नाकरः

MUNI LĀVANYA VIJAYA SŪRI

VOL. VII

NAVRANG

Domain. Vipin Kumar Collection

Digitized by Madhuban Trust

About the book

The Sanskrit language which is more perfect than Greek and more copious than other languages has a wonderful structure. The structure of this ancient but living language has been analysed and described by etymologists and grammarians since at least the eighth century B.C. The ancient grammarians traced the basic elements of most of the vocables of the language to verbal roots called *dhatu-s*, some two thousand in numbers. Sanskrit has an elaborate system of conjugation of all the roots in ten tenses and moods; besides each root has its causative, desiderative, frequentative and passive forms. There is a system of constructing verbal roots from substantives, which again are conjugated in ten tense/mood forms. Therefore, the conjugational system of Sanskirt grammar has a vast dimension, which is perfectly codified by the grammarians. Though the rules of grammar are precise and definitive, it is difficult to know or derive the particular forms of verbs with the help of those rules.

With a view to minimizing this difficulty and to make all verbal forms easily available the great Jain savant Muni Lavanyavijaya compiled with unprecedented labour and dedication a monumental work, under title *Dhaturatnakara* (literally Ocean of verbal roots) in seven volumes. The *Dhaturatnakara* is a ready reckoner for the users of the Sanskirt language so far as the verb forms are concerned.

This great work remained out of print for more than two decades. In view of the immense usefulness of the work, it is now being reproduced and published.

ISBN: 81-7013-104-9
1992

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

DHĀTURATNĀKARA

Vol. VI

NĀMADHĀTU

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

REPRODUCTION OF EARLIER EDITION OF
DHĀTURATNĀKARA

DHĀTURATNĀKARA

धातुरत्नाकरः

BY

MUNI LĀVAṆYA VIJAYA SŪRI
मुनिलावण्यविजय सूरिविनिर्मितः

Vol. VI
NĀMADHĀTU

षष्ठो भागः
नामधातु प्रक्रिया

NAVRANG • नवरंग
1992

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

This publication has been brought out with financial assistance from Government of India, Ministry of Human Resources Development.

If any defect is found in this book, please return the copy by V.P.P. to the Publisher for exchange free of cost of postage.

DHĀTURATNĀKARA, VOL VI

First Published 1867 Saka

Reprint 1992

Rs. 820 per set of Vols. 1-7

Published by:
Mrs Nirmal Singal, for
NAVRANG Booksellers & Publishers
RB-7, Inder Puri, New Delhi - 12
Phone: 5722197, 589914

Printed by :
Diamond Printers,
B-74, Phase II, Naraina Industrial Area,
New Delhi - 28

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ अर्हम् ॥

श्रीविजयनेमिसूरिग्रन्थमाला-रत्नम् ८ ॥

॥ आशैशवशीलशालिने श्रीनेमीश्वराय नमो नमः ॥

श्रीमत्तपोगणगगनाङ्गणगगनमणि-सार्वसार्वज्ञशासनसार्वभौम-
सर्वतन्त्रस्वतन्त्र--सूरिचक्रचक्रवर्ति--भट्टारकाचार्यश्रीम-
द्विजयनेमिसूरीश्वरपट्टालंकार–तिलकमञ्जरीटीकादि-
विविधनिबन्धनिबन्धनबन्धुर–व्याकरणवाच-
स्पति--शास्त्रविशारद--कविरत्न–भट्टा-
रकाचार्यश्रीमद्विजयलावण्यसूरि-
प्रणीतो

धातुरत्नाकरः ।

॥ तस्य चायं षष्ठो विभागः ॥

प्रकाशितोऽय राजनगरस्थाया जैनग्रन्थप्रकाशकसभायाः
कार्यवाहकेन " वाडीलाल बापुलाल शाह " इत्यनेन ।

प्रति -५५१ प्रथमावृत्तिः

CC-0. Public Domain. Vipin Kumar Collection, Deoband

श्रीविजयनेमिसूरिग्रन्थमाला-रत्नानि ॥

धातुरत्नाकर भाग	१*	५-०-०
,, ,,	२	४-०-०
,, ,,	३	२-०-०
,, ,,	४	२-०-०
,, ,,	५	४-०-०
,, ,,	६	२-८-०
देवगुर्वष्टक स्वोपज्ञवृत्तिसमेत		०-४-०
देवगुर्वष्टक तथा कदम्बाष्टक		०-१-०
श्री नूतन जिनस्तवनमाला		०-२-०

मुद्र्यमाणग्रन्था :—

१ श्रीसिद्धहेमशब्दानुशासन बृहद्वृत्ति-
लघुन्यासबृहन्न्यासमेत ।

२ धातुरत्नाकरभाग ७ ।

३ स्याद्यन्तरत्नाकर ।

प्राप्तिस्थान—

गुर्जरग्रन्थरत्न कार्यालय,
गांधीरोड, अमदावाद ॥

卐

सरस्वती जैन पुस्तक भंडार,
१४५ गुलालवाडी, मुंबई ॥

मुद्रकः शाह गुलाबचंद लल्लुभाई, 'श्री महोदय प्रिन्टींग प्रेस', दाणापीठ—भावनगर.

* घणी ओछी कोपी छे.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्वतन्त्रस्वतन्त्र-शासनसम्राट्-सूरिचक्रचक्रवर्त्ति जगद्गुरुतपागच्छाधिपति-भट्टारक

जन्म सं. १९२९ कार्तिक शु. १ मधुमती (महुवा) : दीक्षा सं. १९४५ ज्येष्ठ शु. ७ भावनगर



गणिपद सं. १९६० कार्त्तिक कृष्ण ७ वल्लभीपुर (वळा) :

भव्याब्ध्यामदवृद्धिचन्द्रसदृशं, श्रीनेमिसूरीश्वरं ।
सम्यग्दर्शनबोधदानसदनं, चारित्रभानूदयम् ॥
जैनेन्द्रागमतत्त्वनन्दनघनं, लावण्ययोगालयं ॥
भो दक्षास्त्रिविधं हितं प्रणमत, प्रज्ञाप्रमोदक्षमम् ॥ १ ॥

आचार्य श्रीविजयनेमिसूरीश्वरः

सूरिपद सं. १९६४ ज्येष्ठ शु. ५ भावनगर

CC-0. Public Domain. Vipin Kumar Collection, Deoband

श्रीविजयनेमिसूरिग्रन्थमाला-रत्नानि ॥

धातुरत्नाकर भाग १*	....	५-०-०
,, ,, २	....	४-०-०
,, ,, ३	....	२-०-०
,, ,, ४	....	२-०-०
,, ,, ५	....	४-०-०
,, ,, ६	....	२-८-०
देवगुर्वष्टक स्वोपज्ञवृत्तिसमेत	....	०-४-०
देवगुर्वष्टक तथा कदम्बाष्टक	....	०-१-०
श्री नूतन जिनस्तवनमाला	....	०-२-०

मुद्र्यमाणग्रन्था :—

१ श्रीसिद्धहेमशब्दानुशासन बृहद्वृत्ति-
लघुन्यासबृहन्न्यासमेत ।

२ धातुरत्नाकरभाग ७ ।

३ स्याद्यन्तरत्नाकर ।

प्राप्तिस्थान—

गुर्जरग्रन्थरत्न कार्यालय,
गांधीरोड, अमदावाद ॥

卐

सरस्वती जैन पुस्तक भंडार,
१४५ गुलालवाडी, मुंबई ॥

मुद्रकः शाह गुलाबचंद लल्लुभाई, 'श्री महोदय प्रिन्टींग प्रेस', दाणापीठ—भावनगर.

* घणी ओछी कोपी छे.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्वतन्त्रस्वतन्त्र-शासनसम्राट्-सूरिचक्रचक्रवर्त्ति जगद्गुरुतपागच्छाधिपति-भट्टारक

जन्म सं. १९२९ कार्तिक शु. १ मधुमती (महुवा) : दीक्षा सं. १९४५ ज्येष्ठ शु. ७ भावनगर



गणिपद सं. १९६० कार्तिक कृष्ण ७ वल्लभीपुर (वळा) : पन्यासपद सं. १९६० मागशर शु. ३ वल्लभीपुर (वळा)

भव्याऽध्यामदवृद्धिचन्द्रसदृशं, श्रीनेमिसूरीश्वरं ।
सम्यग्दर्शनबोधदानसदनं, चारित्रभानूदयम् ॥
जैनेन्द्रागमतत्त्वनन्दनघनं, लावण्ययोगालयं ॥
भो दक्षास्त्रिविधं हितं प्रणमत, प्रज्ञाप्रमोदक्षमम् ॥ १ ॥

आचार्य श्रीविजयनेमिसूरीश्वरः

सूरिपद सं. १९६४ ज्येष्ठ शु. ५ भावनगर

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

तपोगच्छाधिपति–सर्वतन्त्रस्वतन्त्र–शासनसम्राट्–सूरिचक्रचक्रवर्त्ति–जगद्गुरु–भट्टारकाचार्यवर्य–
Digitized by Madhuban Trust
श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार–
व्याकरणवाचस्पति–शास्त्रविशारद–कविरत्न–निरुपमव्याख्यानसुधावर्षि–विबुधशिरोमणि–धातुरत्नाकर-
तिलकमञ्जरीटीकाद्यनेकग्रन्थप्रणेता—

जन्म–वि. सं. १९५३ भाद्रपद वद ५ दीक्षा–वि. सं. १९७२ अषाढ सुद ५ वडी दीक्षा–वि. सं. १९७३ मागशर
प्रवर्त्तकपद–वि. सं. १९८७ कार्त्तिक (प्रायः) बोटाद (काठीयावाड) ॥ सादडी, (मारवाड) ॥
सुद ३ सादडी, (मारवाड) ॥ वद २, अमदावाद ॥



गणिपद–वि. सं. १९९० मागशर पंन्यासपद–वि. सं. १९९० मागशर उपाध्याय पद–वि. सं. १९९१ जेठ
आचार्यपद–वि. सं. १९९२ वैशाख सुद ६, भावनगर ॥ सुद १०, भावनगर ॥
वद १२, महुवा (काठीयावाड) ॥ सुद ४, अमदावाद ॥

भट्टारकाचार्यश्रीमद्विजयलावण्यसूरीश्वरः ॥

"न्यायव्याकरणागमेषु ललिते, काव्ये तथा छन्दसि। साहित्यप्रभृतौ प्रबन्धगगने यद्बीकराः विस्तृताः॥
प्रत्युत्पन्नमतिः प्रसादसदनं, व्याख्यानवाचस्पतिः। सोऽयं दक्षप्रमोददो विजयते, लावण्यसूरीश्वरः॥१॥"

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रीतपोगच्छाधिपति-शासनसम्राट्-सूरिचक्रचक्रवर्ति-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीमद्विजयनेमि-सूरीश्वरपट्टालंकार-व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न-श्रीमद्विजयलावण्यसूरीश्वर-शिष्यरत्नविद्वद्वर्यमुनिश्रीदक्षविजयशिष्यरत्नविद्वद्वर्यबालमुनिश्रीसुशीलविजयविरचितं

॥ श्रीनेमिसूरीश्वराष्टकम् ॥

[शार्दूलविक्रीडितवृत्तानि]

यज्ज्ञानं च निबन्धसिन्धुतरणे, नौकानिभं वर्त्तते ।
यद्वाणी शुभमानसाम्बुजरवि–र्नानार्थसंबोधिनी ॥
यत्कीर्त्तिः किल दिक्षु विस्तृततरा, चंद्रोज्ज्वला सर्वदा ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ १ ॥

यस्य क्षान्तिरनल्पकोपशमने, धाराधराभा वरा ।
नानाशिष्यप्रशिष्यवृन्दसहितं, सद्बोधिरत्नप्रदम् ॥
दुर्दान्तप्रतिवादिवादनिपुणं, सम्राट्पदालङ्कृतं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ २ ॥

नानातर्कपरायणं गुणयुतं, लावण्यलीलालयं ।
न्यायव्याकरणादिशास्त्ररचना–नैपुण्यभाजां वरम् ॥
तीर्थोद्धारधुरन्धरं मुनिवरं, चारित्ररत्नाकरं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ३ ॥

वैराग्यद्रुमवर्धने जलधरं, श्वेताम्बराग्रेसरं ।
भव्यानामुपकारकारकुशलं, सिद्धान्तपारङ्गतम् ॥
नानादर्शनदर्शनामलधियं, सद्ब्रह्मचर्याश्रितं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ४ ॥

गीतार्थानुसृते तथाऽऽगमगते, पान्थं पथि प्रोद्यतं ।
विद्वद्वृन्दसुवन्दितामलगुणं, विद्वद्सभाभासुरम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यद्वाचा विमलाचलादिप्रभृतेः, संघा वरा निर्गता ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ५ ॥

नन्दीवर्धनकारितप्रतिमया, श्रीवर्द्धमानप्रभो ।
रम्ये काननमण्डिते मधुपुरे, रत्नाकरालङ्कृते ॥
वर्षारम्भदिने महोदयकरं, यज्जन्म जातं शुभं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ६ ॥

लक्ष्मीचन्द्र इति श्रुतस्सुजनको, यस्यास्ति धर्मोद्यत-
श्रावाचारविचारचारुचरिता, माता च दीपालिका ।
वाग्दक्षो हि सतां प्रियो गुणनिधिः, श्रीबालचन्द्रोऽनुजो ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ७ ॥

येषामीक्षणतोऽपि यान्ति विपुलं, भाग्योदयं सज्जना ।
भूपालावलिमौलिपूजितपदा,—म्भोजं च दिव्याकृतिम् ॥
सम्पूर्णेन्दुसुमण्डलाभवदनं, चन्द्रार्धभालस्थलं ।
वन्देऽहं शुभपादपद्मयुगलं, तं नेमिसूरीश्वरम् ॥ ८ ॥

[स्रग्धरावृत्तम्]

नानाविद्याब्धिदेवाचलविमलधिया—मुक्तिसौभाग्यभाजां ।
श्रीमल्लावण्यसूरीश्वरप्रगुरुसतां, दक्षनाम्नो गुरोश्च ॥
आसाद्यानुग्रहं चाष्टकमिदममलं, श्रीसुशीलेन दृब्धं ।
नित्यं भव्यात्मनां वै श्रुतिपठनकृतां मोददानाय भूयात् ॥ १ ॥

॥ इति श्रीनेमिसूरीश्वराष्टकम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

श्रीतपोगच्छाधिपति--शासनसम्राट्--सूरिचक्रचक्रवर्ति--सर्वतन्त्रस्वतन्त्र--जगद्गुरु--श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार-व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न-श्रीमद्विजयलावण्यसूरीश्वरशिष्यरत्न-स्याद्यन्तरत्नाकरादिप्रणेतृ-विद्वद्वर्य-मुनिश्रीदक्षविजयविरचितम्—

॥ श्रीमद्विजयनेमिसूरीशाष्टकम् ॥

(शार्दूलविक्रीडित-वृत्तानि)

नेत्रानन्ददमस्ति यस्य वदनं,
मिथ्यामतिध्वंसकृत् ।
सूर्याभाऽखिलवस्तुबोधनविधौ,
रीतिर्यदीयाऽमला ॥
शंत्रः श्रीमुनिराजराजितिलको,
वन्द्याङ्घ्रिपद्मद्वयो ।
देयान्नेमिप्रभुस्स तीर्थपगुरु-र्बोधं गतान्धन्तु नः ॥ १ ॥

काव्यव्याकरणागमे सुललिते, वृत्ते च षड्दर्शने ।
साहित्यप्रभृतौ प्रबन्धनिकरे, यत्कौशलं विस्तृतम् ॥
यस्यास्ति प्रतिभा प्रबोधललिता, दक्षप्रमोदक्षमा ।
भव्यानां हृदयं पुनातु स सदा, श्रीनेमिसूरीश्वरः ॥ २ ॥

यस्योक्तिस्सकलार्त्ततापहरणी, सङ्क्लेशसंहारिणी ।
संसारार्णवपारप्राप्तितरणी, सद्बोधविस्तारिणी ॥
सद्विज्ञानरमाविहारधरणी, सन्मार्गसंचारिणी ।
जीयान्नेमिप्रभुस्स भारतमणिः, सूरीशमालाग्रणीः ॥ ३ ॥

कीर्त्तिर्यस्य दिगङ्गनाङ्गणगता, सार्वं च यं संश्रिताः ।
वन्दन्ते विबुधाश्च भक्तिकलिता, जैनाश्च जैनेतराः ॥
विश्वेऽस्मिन्नतुलप्रभावभवनं, ध्येयश्च यः साधुभिः ।
सोऽयं नेमिप्रभुस्तनोतु सुमतिं, भट्टारकः सूरिराट् ॥ ४ ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

यन्नामस्मरणं हि भीतिहरणं, रोगोपसर्गापहं ।
भव्यानां निखिलार्थसिद्धिसदनं, सन्तापपापापहम् ॥
संसारानलदाहशान्तिसलिलं, यद्दर्शनं शर्मदं ।
पायाद्वः सततन्त्वपायवितते:, सूरिस्स नेमीश्वरः ॥ ५ ॥

तीर्थोद्धारपरायणः समयविद्-विद्वत्सभाशेखरो ।
भव्यारामघनश्च मुक्तिफलदः कल्याणकल्पद्रुमः ॥
यस्यान्तःकरणं रतन्तु सततं, सत्त्वोपकारेषु सः ।
कल्याणं विपुलं ददातु भविनां, श्रीनेमिसूरिस्सदा ॥ ६ ॥

भव्यान्तःकरणारविन्दमिहिरो, माङ्गल्यमालाप्रदः ।
श्रीमत्तीर्थपशासनैकरसिकः, कन्दर्पदर्पापहः ॥
कारुण्याङ्कुरवर्धने जलधरो, गीतार्थचूलामणिः ।
स्तुत्योऽयं खलु नेमिसूरिभगवान्, साक्षात्सुरद्रूपमः ॥ ७ ॥

भव्याब्ध्यामदवृद्धिचन्द्रसदृशं, श्रीनेमिसूरीश्वरं ।
सम्यग्दर्शनबोधदानसदनं, चारित्रभानूदयम् ॥
जैनेन्द्रागमतत्त्वनन्दनघनं, लावण्ययोगालयं ।
दक्षोऽहं त्रिविधं हि तं प्रतिदिनं, वन्दे मुदानन्ददम् ॥ ८ ॥

एतच्छ्रीधृतिबुद्धिवृद्धिशिवदं, श्रीनेमिसूर्यष्टकं ।
भव्यप्राणिप्रमोददाननिपुणं, दुष्कर्ममर्मापहम् ॥
यो नित्यं पठति प्रबोधसमये, सद्ध्यानधाराधरः ।
स प्राप्नोति विशालमङ्गललता-मिष्टार्थसिद्धिप्रदाम् ॥ ९ ॥

॥ इति श्रीनेमिसूरीशाष्टकम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ धातुरत्नाकरषष्ठभागशुद्धिपत्रम् ॥

पत्र,	कॉलम,	पङ्क्ति,	अशुद्धि,	शुद्धि,
५	३	४	म्,	यम्,
,,	४	५	तात्,	न्तु, तात्,
९	०	१३	त्ती	ती
११	२	६	तम्,	म्,
१२	४	५	वम्,	यम्,
१६	४	६	ाणि,	ानि,
२०	४	१५	हिणौ	हिणो
२६	१	६	लिखि	लिखित
२९	१	१७	नू,	नृ,
४०	०	५	क्रिप्	क्विप्
४४	४	११	वक्ष्	क्ष्म्
४५	२	१६	रय	स्य
४६	३	१	च्छ	वाचर
५०	४	१०	रिया	रिरा
५३	१	१२	लेख्या	लिख्या
५६	१	७	ाणि,	ानि,
,,	३	,,	,,	,,
६१	१	५	म्,	यम्,
,,	,,	६	हि,	",
६२	३	५	,,	,,
६३	४	६	,,	,,
६९	२	१	चन्द	चन्द्र
७१	,,	२	५८	१२३
८८	२	३	५४	५५
,,	३	२	५५	५६
८९	१	१२	च्यि	चि
,,	२	....	च्छ	च्छय

पत्र,	कॉलम,	पङ्क्ति,	अशुद्धि,	शुद्धि,
९४	४	५	–ष्ट,	षी–ष्ट,
९५	१	१७	,,	,,
,,	३	१	ऋमु	ऋभु
११२	४	७	यताम्	येताम्
११५	१	१७	ष्यताम्,	ष्येताम्.
१२०	१	४	पटय	पटप
१२३	१	२	८	७
१२८	१	९	स्थाने–	

५ अजहस्त्–अत, एताम्, अन्त, अथाः, एथाम्, अध्वम्, ए, आवहि, आमहि॥

१२८ २ ९ स्थाने–

५ अपपाद्–अत, एताम्, अन्त, अथाः, एथाम्, अध्वम्, ए, आवहि, आमहि॥

पत्र,	कॉलम,	पङ्क्ति,	अशुद्धि,	शुद्धि,
१३१	०	१३	एव	एवं
१३४	४	१५	देशे	देशं
१३७	१	२१	पुत्रभि	पुत्रमि
,,	४	२	रूप	रूपा
१३८	१	४	त,	त्
,,	२	१	वध्यं	वध्वं
१४४	१	२	चिह	चिह्वि
१४५	३	१६	पक्ष	पेक्ष
,,	४	११	रो	रौ
१४६	४	१७	पश्चा	पश्चाद्
१४७	२	९	क्रार,	कार,
,,	,,	१०	सु,	सुः,

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्र,	कॉलम,	पङ्क्ति,	अशुद्धि,	शुद्धि,
१४७	३	९	क्रार,	कार,
,,	४	,,	,,	,,
१४८	१	४	यु,	युः,
,,	,,	१०	क्रार,	कार,
,,	२	९	,,	,,
,,	३	८	,,	,,
,,	४	९	,,	,,
१४९	१	१०	,,	,,
,,	२	९	,,	,,

पत्र,	कॉलम,	पङ्क्ति,	अशुद्धि,	शुद्धि,
१५१	१	१	तुलि	तूलि
१५२	४	५	त्या	त्य
,,	,,	७	त्य	त्या
१५७	२	१	ऊर्वी	उर्वी
१७३	१	१६	ञयं	व्य
१८७	०	१	कस	कंस
१८८	हास्यास्प—हास्यास्पद			
,,	प्राथ्याः—प्रार्थ्याः			
,,	प्रमाजन—प्रमार्जन			

इति शुद्धिपत्रम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धातुरत्नाकरषष्ठभागस्य विषयानुक्रमणिका ।

पत्र

१, मङ्गलाचरण—नामधातुलक्षण—नामप्रकृतिकक्रियावाचकप्रत्ययगणनाः ।
२, काम्यप्रत्ययविधायकसूत्रोदाहरणादि ।
३–७, काम्यप्रत्ययान्तोदाहरणानि ।
८–९, क्यन्प्रत्ययविधायकसूत्रार्थविवेचनादि ।
१०–३९, क्यन्प्रत्ययान्तोदाहरणानि ।
४०–७२, क्विप्प्रत्ययविधायकसूत्रोदाहरणादि स्वतन्त्रोदाहरणानि च ।
७३–७४, क्यङ्प्रत्ययविधायकसूत्राणि तन्निष्यन्दश्च ।
७५–११८, क्यङ्प्रत्ययान्तोदाहरणानि ।
११९, क्यङ्ष्प्रत्ययविधायकसूत्रोदाहरणादि ।
१२०–१२७, क्यङ्ष्प्रत्ययान्तोदाहरणानि ।
१२८, णिङ्प्रत्ययविधायकसूत्रोदाहरणादि ।
१२८–१३१, णिङ्प्रत्ययान्तोदाहरणानि ।
१३१–१३३, णिच्प्रत्ययविधायकसूत्रविस्तारः ।
१३३–१८७, णिच्प्रत्ययान्तोदाहरणानि ।
१८७–१८८, णिच्प्रत्ययान्तस्य विशेषवक्तव्यता ग्रन्थसमाप्तिश्च ।

इति धातुरत्नाकरषष्ठभागस्य लघ्वी विषयानुक्रमणिका ॥

१ काम्यप्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
३	१	पुत्र	६	१०	उच्चैस्
४	२	इदम्	,,	११	स्वर्
,,	३	किम्	,,	१२	विभु
,,	४	दोषा	,,	१३	समिध्
,,	५	यशस्	७	१४	राजन्
५	६	सर्पिष्	,,	१५	वाच
,,	७	अहन्			
,,	८	गिर्			
,,	९	श्वस्			

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

२ क्यन्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
१०	१	अ	१७	३२	क्षीर
,,	२	आ	,,	३३	लवण
,,	३	इ	,,	३४	,,
,,	४	ई	,,	३५	तीर्थपा
,,	५	उ	१८	३६	माला
,,	६	ऊ	,,	३७	रमा
,,	७	ऋ	,,	३८	कवि
,,	८	ॠ	,,	३९	रवि
११	९	ऌ	१९	४०	अग्नि
,,	१०	ॡ	,,	४१	सुमति
,,	११	ए	,,	४२	दधि
१२	१२	ऐ	,,	४३	,,
,,	१३	ओ	२०	४४	,,
,,	१४	औ	,,	४५	सखी
,,	१५	पुत्र	,,	४६	प्रधी
१३	१६	सुपुत्र	,,	४७	विधु
,,	१७	अज	२१	४८	धनु
,,	१८	सुख	,,	४९	चमू
,,	१९	धर्म	,,	५०	जू
१४	२०	गार्ग्य	,,	५१	भू
,,	२१	अशन	२२	५२	पितृ
,,	२२	,,	,,	५३	मातृ
,,	२३	उदक	,,	५४	पितृ
१५	२४	,,	,,	५५	गम्ऌ
,,	२५	धन	२३	५६	,,
,,	२६	,,	,,	५७	गम्ॡ
,,	२७	वृष	,,	५८	से
१६	२८	,,	,,	५९	रै (सै)
,,	२९	अश्व	२४	६०	गो
,,	३०	,,	,,	६१	द्यो
,,	३१	क्षीर			

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम
,,	६२	नौ
,,	६३	ग्लौ
२५	६४	लोक्
,,	६५	चित्रलिख्
,,	६६	सुवल्ग्
,,	६७	श्लाघ्
२६	६८	लिखितङ्
,,	६९	वाच्
,,	७०	सध्र्यच्
,,	७१	सध्र्यञ्च्
२७	७२	देवद्र्यञ्च्
,,	७२	देवद्र्यच्
,,	७३	चित्रितच्छ्
,,	७४	राज्
२८	७५	विषयोज्झ्
,,	७६	उपदिष्टञ्
,,	७७	सरद्
,,	७८	लघद्
२९	७९	सुपठ्
,,	८०	वाड्
,,	८१	लुप्तद्
,,	८२	सुगण्
३०	८३	जगत्
,,	८४	सुनत्
,,	८५	दधिमथ्
,,	८६	अग्निमथ्
३१	८७	शरद्
,,	८८	व्याघ्रपाद्
,,	८९	युष्मद्
,,	९०	,,
३२	९१	अस्मद्

पत्राङ्क	धात्वङ्क	नाम
३२	९२	,,
,,	९३	समिध्
,,	९४	बुध्
३३	९५	राजन्
,,	९६	अहन्
,,	९७	अप्
,,	९८	मालागुफ्
३४	९९	सुकन्
,,	१००	ककुभ्
,,	१०१	जय्
,,	१०२	गिर्
३५	१०३	पुर्
,,	१०४	कमल्
,,	१०५	दिव्
,,	१०६	दृश्
३६	१०७	त्विष्
,,	१०८	पयस्
,,	१०९	अदस्
,,	११०	विद्वस्
३७	१११	अनडुह्
,,	११२	गोरक्ष्
इति इच्छाक्यजन्ताः, अथाचारक्यजन्ताः ।		
३७	११३	पुत्र
,,	११४	वस्त्र
३८	११५	प्रासाद
,,	११६	कुटी
,,	११७	पर्यङ्क
अथ करोत्यर्थकक्यजन्ताः ।		
३८	११८	तपस्
३९	११९	नमस्
,,	१२०	वरिवस्
,,	१२१	चित्र

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

३ क्विप्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

पत्राङ्क,	धात्वङ्क,	नाम	पत्राङ्क	धात्वङ्क	नाम
४०	१	अ	४८	३१	नृ
,,	२	आ	,,	३२	पितृ
४१	३	इ	,,	३३	स्वसृ
,,	४	ई	,,	३४	पितॄ
,,	५	उ	४९	३५	नॄ
,,	६	ऊ	,,	३६	क्लृ
४२	७	ऋ	,,	३७	गम्लृ
,,	८	ॠ	,,	३८	क्लॄ
,,	९	ऌ	५०	३९	गम्लॄ
,,	१०	ॡ	,,	४०	हे
४३	११	ए	,,	४१	प्रियहे
,,	१२	ऐ	,,	४२	रै
,,	१३	ओ	५१	४३	लब्धरै
,,	१४	औ	,,	४४	गो
४४	१५	क	,,	४५	प्रियद्यो
,,	१६	पुत्र	,,	४६	नौ
,,	१७	अश्व	५२	४७	प्रियग्लौ
,,	१८	क्ष्मा	,,	४८	सुचक्
४५	१९	माला	,,	४९	तत्त्वलोक्
,,	२०	प्रमदा	,,	५०	राख्
,,	२१	वि	५३	५१	चित्रलिख्
,,	२२	कवि	,,	५२	सुवल्ग्
४६	२३	धी	,,	५३	प्रियवल्ग्
,,	२४	श्री	,,	५४	श्लाघ्
,,	२५	प्रियधी	५४	५५	देवश्लाघ्
,,	२६	विधु	,,	५६	आङ्
४७	२७	विभु	,,	५७	पठितङ्
,,	२८	द्रु	,,	५८	त्वच्
,,	२९	भू	५५	५९	जलमुच्
,,	३०	जम्बू	,,	६०	सध्र्यच्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
,,	६१	सच्छ्	,,	९२	राजन्
,,	६२	पठितच्छ्	,,	९३	अहन्
५६	६३	सम्राज्	,,	९४	गुप्
,,	६४	देवेज्	६४	९५	बहुप्
,,	६५	सज्झ्	,,	९६	कफ्
,,	६६	गृहोज्झ्	,,	९७	मालागुफ्
५७	६७	नञ्	,,	९८	कब्
,,	६८	लब्धञ्	६५	९९	आम्रचुम्ब्
,,	६९	पट्	,,	१००	सभ्
,,	७०	सरट्	,,	१०१	ककुभ्
५८	७१	शठ्	,,	१०२	कम्
,,	७२	शास्त्रपठ्	६६	१०३	लब्धशम्
,,	७३	अद्	,,	१०४	हय्
,,	७४	तत्त्वाड्	,,	१०५	लिखितय्
५९	७५	सद्	,,	१०६	गिर्
,,	७६	दृषद्	६७	१०७	रुद्धद्वार्
,,	७७	सुगण्	,,	१०८	सल्
,,	७८	गृहगण्	,,	१०९	कमल्
६०	७९	चित्	,,	११०	दिव्
,,	८०	भवत्	६८	१११	परमदिव्
,,	८१	रथ्	,,	११२	विश्
,,	८२	दधिमथ्	,,	११३	घृतस्पृश्
६१	८३	प्रमुद्	,,	११४	त्विष्
,,	८४	शरद्	६९	११५	रत्नमुष्
,,	८५	युष्मद्	,,	११६	मास्
,,	८६	युष्मद्	,,	११७	चन्द्रमस्
६२	८७	अस्मद्	,,	११८	अदस्
,,	८८	,,	७०	११९	उपानह्
,,	८९	बुध्	,,	१२०	गोदुह्
,,	९०	तत्त्वबुध्	,,	१२१	अनडुह्
६३	९१	श्वन्	७१	१२२	तक्ष्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
,,	१२३	गोरक्ष्	७२	१२५	क्लीब
,,	१२४	गल्भ	,,	१२६	होड

४ क्यङ्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
७५	१	अ	,,	२९	सपत्नी
,,	२	आ	,,	३०	,,
,,	३	इ	८२	३१	ब्राह्मणी
,,	४	ई	,,	३२	,,
,,	५	उ	,,	३३	पञ्चमी
,,	६	ऊ	,,	,,	माहेश्वरी
,,	७	ऋ	,,	,,	चारुकेशी
७६	८	ॠ	,,	,,	वानरी
,,	९	ऌ	,,	३४	ग्रामणी
,,	१०	,,	८३	३५	मृद्वी
,,	११	ॡ	,,	३६	पट्वी
७७	१२	ए	,,	३७	भानु
,,	१३	ऐ	,,	३८	पङ्गू
,,	१४	ओ	८४	३९	श्वश्रू
,,	१५	औ	,,	४०	,,
७८	१६	क	,,	४१	पितृ
,,	१७	हंस	,,	४२	स्वसृ
,,	१८	गार्ग्य	८५	४३	पितॄ
,,	१९	माला	,,	४४	गम्ऌ
७९	२०	प्रमदा	,,	४५	,,
,,	२१	मद्रिका	,,	४६	गम्ॡ
,,	२२	पाचिका	८६	४७	हे
,,	२३	चिन्तामणि	,,	४८	रै
८०	२४	युवति	,,	४९	गो
,,	२५	एनी	,,	५०	नौ
,,	२६	कुमारी	८७	५१	सर्वलोकृ
,,	२७	पुत्री	,,	५२	चित्रलिख्
८१	२८	सपत्नी	,,	५३	सुवल्ग्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
८८	५४	देवश्लाघ्	,,	८५	गिर्
,,	५५	उपदिष्टङ्	,,	८६	सुफुल्ल्
,,	५६	त्वच्	,,	८७	दिव्
८९	५७	सभ्रयच्	९९	८८	प्राच्छ्
,,	५८	चित्रितच्छ्	,,	८९	सजुष्
,,	५९	सम्राज्	,,	९०	ओजस
९०	६०	उज्झ्	१००	१९	अप्सरस्
,,	६१	उदितञ्	,,	९२	पयस्
,,	६२	सरट्	,,	९३	,,
९१	६३	शास्त्रपठ्	१०१	९४	लिह्
,,	६४	अड्ड्	,,	९५	गोरक्ष्
,,	६५	उत्कद्	१०२	९६	भृश
९२	६६	सुगण्	,,	९७	उत्सुक
,,	६७	मरुत्	,,	९८	शीघ्र
,,	६८	दधिमथ्	,,	९९	चपल
९३	६९	तद्	१०३	१००	पण्डित
,,	७०	सुपाद्	,,	१०१	आण्डर
,,	७१	युष्मद्	,,	१०२	क्रण्डर
९४	७२	,,	,,	१०३	फेन
,,	७३	अस्मद्	१०४	१०४	शुचि
,,	७४	,,	,,	१०५	नील
९५	७५	समिध्	,,	१०६	हरित
,,	७६	राजन्	,,	१०७	मन्द
,,	७७	ऋभुक्षन्	१०५	१०८	मद्र
९६	७८	अहन्	,,	१०९	भद्र
,,	७९	स्वप्	,,	११०	संश्चत्
,,	८०	मालागुफ्	,,	१११	तृपत्
९७	८१	सुकब्	१०६	११२	रेफत्
,,	८२	ककुभ्	,,	११३	रेहत्
,,	८३	इदम्	,,	११४	वेहत्
९८	८४	जय्	,,	११५	वर्चस्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
१०७	११६	उन्मनस्	,,	१३९	सोढ
,,	११७	सुमनस्	११३	१४०	प्रतीप
,,	११८	दुर्मनस्	,,	१४१	शब्द
,,	११९	अभिमनस्	,,	१४२	वैर
१०८	१२०	ओजस्	,,	१४३	कलह
,,	१२१	कष्ट	११४	१४४	ओघ
,,	१२२	कक्ष	,,	१४५	वेग
,,	१२३	कृच्छ्र	,,	१४६	युद्ध
१०९	१२४	सत्र	,,	१४७	अभ्र
,,	१२५	गहन	११५	१४८	कण्व
,,	१२६	रोमन्थ	,,	१४९	मम
,,	१२७	फेन	,,	१५०	मेघ
११०	१२८	ऊष्मन्	,,	१५१	अटा
,,	१२९	बाष्प	११६	१५२	अट्टा
,,	१३०	धूम	,,	१५३	अटाट्या
,,	१३१	सुख	,,	१५४	शीका
१११	१३२	दुःख	,,	१५५	सोटा
,,	१३३	तृप्र	११७	१५६	कोटा
,,	१३४	कृच्छ्र	,,	१५७	पोटा
,,	१३५	आस्र	,,	१५८	प्रुष्वा
११२	१३६	अलीक	,,	१५९	सुदिन
,,	१३७	करण	११८	१६०	दुर्दिन
,,	१३८	कृपण	,,	१६१	नीहार

५ क्यङ्ष्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि ।

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
			,,	८	हर्ष
१२०	१	पटत्	१२४	९	गर्व
,,	२	लोहित	,,	१०	सुख
१२१	३	लोहिनी	१२५	११	दुःख
,,	४	जिह्म	,,	१२	मूर्च्छा
१२२	५	श्याम	१२६	१३	निद्रा
,,	६	धूम	,,	१४	कृपा
१२३	७	चर्मन्	१२७	१५	करुणा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

६ णिङ्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क,	धात्वङ्क,	नाम
१२८	१	हस्त	१३०	७	संभाण्ड
,,	२	पाद	,,	८	परिभाण्ड
१२९	३	ग्रीवा	,,	९	परिचीवर
,,	४	परिपुच्छ	,,	१०	सचीवर
,,	५	विपुच्छ	१३१	११	चीवर
,,	६	पुच्छ			

७ णिच्प्रत्ययान्तप्रकरणान्तर्गतनामधातूनामवयवभूतानि नामानि

१३३	१	अङ्क	,,	२५	लवण
,,	२	अन्तिक	,,	२६	लक्षण
१३४	३	आह्वरक	१४०	२७	वर्ण
,,	४	उपश्लोक	,,	२८	अपहस्त
,,	५	तिलक	,,	२९	उत्तूस्त
,,	६	वृन्दारक	,,	३०	कृत
१३५	७	संवर्ग	१४१	३१	गालोडित
,,	८	उल्लाघ	,,	३२	वितूस्त
,,	९	दीर्घ	,,	३३	पर्यन्त
,,	१०	त्वच	,,	३४	वार्त
१३६	११	अवलोष्ट	१४२	३५	व्रत
,,	१२	उद्घाट	,,	३६	अर्थ
,,	१३	प्रकट	,,	३७	कृतार्थ
,,	१४	दण्ड	,,	३८	वेद
१३७	१५	मुण्ड	१४३	३९	अन्ध
,,	१६	ऊढ	,,	४०	गन्ध
,,	१७	दृढ	,,	४१	वृद्ध
,,	१८	परिवृढ	,,	४१	,,
१३८	१९	वाढ	१४४	४२	चिह्न
,,	२०	अवचूर्ण	,,	४३	अल्प
,,	२१	उत्तृण	,,	४३	,,
,,	२२	कर्ण	,,	४४	निरूप
१३९	२३	कृष्ण	१४५	४५	पुष्प
,,	२४	प्रमाण	,,	४६	रूप

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
,,	४७	अर्य	,,	७६	ह्रस्व
,,	४८	प्रिय	,,	७७	कृश
१४६	४९	प्रशस्य	,,	७८	भृश
,,	,,	,,	१५४	७९	विपाश
,,	,,	,,	,,	८०	संपाश
,,	५०	सत्य	,,	८१	वृक्ष
१४७	५१	अश्व	,,	८२	अभिसेना
,,	५२	क्षिप्र	१५५	८३	उपवीणा
,,	५३	क्षुद्र	,,	८४	खट्वा
,,	५४	चिर	,,	८५	तुला
१४८	५५	छिद्र	,,	८६	असि
,,	५६	तृप्र	१५६	८७	इ
,,	५७	दूर	,,	८८	कलि
,,	५८	परिवस्त्र	,,	८९	वासि
१४९	५९	पुत्र	,,	९०	हलि
,,	६०	मिश्र	१५७	९१	ई
,,	६१	वीर	,,	९२	उर्वी
,,	६२	शूर	,,	९३	ऋज्वी
१५०	६३	संवस्त्र	,,	९४	एनी
,,	६४	सूत्र	१५८	९५	गुर्वी
,,	६५	स्थिर	,,	९६	पट्वी
,,	६६	स्फिर	,,	९७	पृथ्वी
१५१	६७	अनुतूल	,,	९८	बह्वी
,,	६८	उत्कूल	१५९	९९	मृद्वी
,,	६९	कुशल	,,	१००	लघ्वी
,,	७०	बल	,,	१०१	वासी
१५२	७१	बहुल	,,	१०२	स्त्री
,,	७२	शील	१६०	१०३	उ
,,	७३	स्थूल	,,	१०४	उरु
,,	७४	अत्यश्व	,,	१०५	ऋजु
१५३	७५	समश्व	,,	१०६	ओतु

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम
१६१	१०७	गुरु
,,	१०८	पटु
,,	१०९	परशु
,,	११०	पृथु
१६२	१११	बहु
,,	११२	मृदु
,,	११३	लघु
१६३	११४	ऊ
,,	११५	भू
,,	११६	भ्रू
,,	११७	नृ
१६४	११८	भर्तृ
,,	११९	भ्रातृ
,,	१२०	मातृ
,,	१२१	लृ
१६५	१२२	से
,,	१२३	हे
,,	१२४	रै
,,	१२५	गो
१६६	१२६	द्यो
,,	१२७	गोनौ
,,	१२८	नौ
,,	१२९	लोक्
१६७	१३०	शाख्
,,	१३१	लग्
,,	१३२	श्लाघ्
,,	१३३	माङ्
१६८	१३४	अदद्र्यञ्च्
,,	१३५	अदमुयञ्च्
,,	१३६	अमुद्र्यञ्च्
,,	१३७	अमुमुयञ्च्

पत्राङ्क	धात्वङ्क	नाम
१६९	१३८	उदञ्च्
१७०	१३९	तिर्यञ्च्
,,	१४०	दध्यञ्च्
,,	१४१	देवद्र्यञ्च्
१७१	१४२	वाच्
,,	१४३	विश्वद्र्यञ्च्
,,	१४४	सध्र्यञ्च्
,,	१४५	सम्यञ्च्
१७२	१४६	प्रच्छ्
,,	१४७	ऊर्ज्
,,	१४८	विश्वसृज्
,,	१४९	उज्झ्
१७३	१५०	नञ्
,,	१५१	अट्
,,	१५२	पठ्
,,	१५३	अड्
१७४	१५४	सुढ्
,,	१५५	गण्
,,	१५६	कर्तृमत्
,,	१५७	त्वग्वत्
१७५	१५८	वसुमत्
,,	,,	,,
,,	१५९	वृत्
,,	१६०	संक्रामत्
१७६	१६१	सरित्
,,	१६२	मथ्
,,	१६३	अस्मद्
,,	१६४	,,
१७७	१६५	तद्
,,	,,	दरद्
,,	१६६	दृषद्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्राङ्क	धात्वङ्क	नाम	पत्राङ्क	धात्वङ्क	नाम
,,	१६७	युष्मद्	,,	१८४	ककुभ्
१७८	,,	,,	१८३	१८५	स्तम्भ्
,,	१६८	शरद्	,,	१८६	इदम्
,,	१६९	बुध्	,,	१८७	शाम्
,,	१७०	अनुलोमन्	,,	१८८	अद्
१७९	१७१	ओजस्विन्	१८४	१८९	वार्
,,	१७२	दुःखिन्	,,	१९०	स्वर्
,,	१७३	पयस्विन्	,,	१९१	शल्
१८०	१७४	युवन्	,,	१९२	दिव्
,,	,,	,,	१८५	१९३	तादृश्
,,	१७५	राजन्	,,	१९१	दिश्
,,	१७६	श्वन्	,,	१९५	चक्षुष्
१८१	१७७	सुखिन्	,,	१९६	त्विष्
,,	१७८	स्वामिन्	१८६	१९७	पुम्स्
,,	१७९	स्रग्विन्	,,	१९८	विद्वस्
,,	१८०	अप्	,,	१९९	गोदुह्
१८२	१८१	स्वाप्	,,	२००	लिह्
,,	१८२	गुफ्	१८७	२०१	गोरक्ष्
,,	१८३	क्षीब्	,,	२०२	तक्ष्

इति धातुरत्नाकरषष्ठभागस्य वृहद्विषयानुक्रमणिका

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

॥ श्रीमज्जिनपुङ्गवेभ्यो नमः ॥

सकलस्वपरसमयपारावारपारीण-विद्यापीठादिप्रस्थानपञ्चकसमाराधक-तपोगच्छाधिपति-
भट्टारकाचार्यजगद्गुरुश्रीमद्विजयनेमिसूरिभगवद्भ्यो नमः ॥

श्रीमत्तपोगणगगनाङ्गणगगनमणि-सार्वसार्वज्ञशासनसार्वभौम-कोविदकुलालङ्कार-अखण्ड-
विजयश्रीमद्गुरुराजविजयनेमिसूरीश्वरचरणारविन्दचञ्चरीकायमाणेनान्तेवासिना
शास्त्रविशारदेन कविरत्नेन व्याकरणवाचस्पतिना च महोपाध्याय-
लावण्यविजयगणिना प्रणीतो—

॥ धातुरत्नाकरः ॥

॥ तस्य चायं षष्ठो भागः ॥

नत्वा श्रीनेमिनामानमाजन्मब्रह्मचारिणम् ।
तीर्थनाथं गुरुश्चैव भारतीं जिनभाषिताम् ॥ १ ॥
धातुरत्नाकरे षष्ठं विभागं बालहेतवे ।
वाचकोपपदस्तन्वे लावण्यविजयो गणिः ॥ २ ॥

निरूपिता यङ्लुबन्तप्रक्रिया । इदानीं नामधातुप्रक्रिया निरूप्यते । नामधातुत्वञ्च नामावयवकत्वे सति क्रियावाचकत्वं नामप्रकृतिकप्रत्ययप्रयोज्यक्रियावाचकत्वं वा । एतदेवाभिप्रेत्योच्यते "यत्र नामैव प्रत्ययसम्बन्धाद्धातुत्वं याति स नामधातुरिति" । एवञ्च नामधातोर्नामप्रकृतिकक्रियावाचकप्रत्ययाधीनत्वेन तादृशाः प्रत्ययाः कतीति जिज्ञासायां सप्तेति वक्तव्यम् । तथाहि । काम्य-क्यन्-क्विप्-क्यङ्-क्यङ्ष्-णिङ्-णिच् इति सप्त प्रत्यया नामधातुनिष्पादका भवन्ति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

तदेतत्प्रत्ययभेदेन नामधातुप्रकरणमपि सप्तधा भिद्यते । तथाहि । प्रथमं काम्यप्रत्ययान्तप्रकरणं द्वितीयं क्यन्प्रत्ययान्तप्रकरणं तृतीयं क्विप्प्रत्ययान्तप्रकरणं चतुर्थं क्यङ्प्रत्ययान्तप्रकरणं पञ्चमं क्यङ्ष्प्रत्ययान्तप्रकरणं षष्ठं णिङ्प्रत्ययान्तप्रकरणं सप्तमं च णिच्प्रत्ययान्तप्रकरणमिति । तत्र प्रथमं तावद् यथोद्देशन्यायेन काम्यप्रत्ययान्तप्रकरणं निरूप्यते ॥ ननु कीदृशान्नाम्नः कस्मिन्नर्थे काम्यप्रत्ययो भवतीति चेद् गृहाणेदं सूत्रम् ॥

द्वितीयायाः काम्यः ॥ ३ । ४ । २२ ॥

द्वितीयान्तान्नाम्न इच्छायामर्थे काम्यप्रत्ययो वा भवति । पुत्रमिच्छति पुत्रकाम्यति । इदंकाम्यति । स्वःकाम्यति । काम्येनैव कर्मण उक्तत्वाद्भावकर्त्रोरेव प्रयोगः । पुत्रकाम्यतेऽनेन । पुत्रकाम्यत्यसौ । द्वितीयाया इति किम् ? इष्टः पुत्रः । इष्यते पुत्रः । इह कस्मान्न भवति, भ्रातुः पुत्रमिच्छति, आत्मनः पुत्रमिच्छति, महान्तं पुत्रमिच्छति, स्थूलं, दर्शनीयं वा, सापेक्षत्वात् । न ह्यन्यमपेक्षमाणोऽन्येन सहैकार्थीभावमनुभवितुं शक्नोति । भ्रातुष्पुत्रकाम्यतीत्यादि तु समर्थत्वात् । अघमिच्छति, दुःखमिच्छतीत्यत्रापि परस्येत्यपेक्षितत्वात्सापेक्षत्वम् । कथं तर्हि पुत्रकाम्यतीत्यत्र पुत्रस्यात्मीयता गम्यतेऽन्यस्याश्रुतेरिच्छायाश्चात्मविषयत्वादिति ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

१ पुत्रमिच्छतीति पुत्रकाम्यति । पुत्रकाम्य–धातोरूपाणि ।

वर्तमाना, लट्, Present १.

पुत्रकाम्यति, पुत्रकाम्यतः, पुत्रकाम्यन्ति ।
पुत्रकाम्यसि, पुत्रकाम्यथः, पुत्रकाम्यथ ।
पुत्रकाम्यामि, पुत्रकाम्यावः, पुत्रकाम्यामः ॥

सप्तमी, विध्यर्थ, लिङ् Potential २.

पुत्रकाम्येत्, पुत्रकाम्येताम्, पुत्रकाम्येयुः ।
पुत्रकाम्येः, पुत्रकाम्येतम्, पुत्रकाम्येत ।
पुत्रकाम्येयम्, पुत्रकाम्येव, पुत्रकाम्येम ॥

पञ्चमी, आज्ञार्थ, लोट्, Imperative ३.

पुत्रकाम्यतु / पुत्रकाम्यतात्, पुत्रकाम्यताम्, पुत्रकाम्यन्तु ।
पुत्रकाम्य / पुत्रकाम्यतात्, पुत्रकाम्यतम्, पुत्रकाम्यत ॥
पुत्रकाम्याणि, पुत्रकाम्याव, पुत्रकाम्याम ॥

ह्यस्तनी, लङ्, Imperfect ४.

अपुत्रकाम्यत्, अपुत्रकाम्यताम्, अपुत्रकाम्यन् ।
अपुत्रकाम्यः, अपुत्रकाम्यतम्, अपुत्रकाम्यत ।
अपुत्रकाम्यम्, अपुत्रकाम्याव, अपुत्रकाम्याम ॥

अद्यतनी, लुङ्, Aorist ५.

अपुत्रकाम्यीत्, अपुत्रकाम्यिष्टाम्, अपुत्रकाम्यिषुः ।
अपुत्रकाम्यीः, अपुत्रकाम्यिष्टम्, अपुत्रकाम्यिष्ट ।
अपुत्रकाम्यिषम्, अपुत्रकाम्यिष्व, अपुत्रकाम्यिष्म ॥

परोक्षा, लिट्, Perfect ६.

पुत्रकाम्याञ्चकार, / पुत्रकाम्यांचकार, — पुत्रकाम्याञ्चक्रतुः / पुत्रकाम्यांचक्रतुः — पुत्रकाम्याञ्चक्रुः / पुत्रकाम्यांचक्रुः
पुत्रकाम्याञ्चकर्थ / पुत्रकाम्यांचकर्थ — पुत्रकाम्याञ्चक्रथुः / पुत्रकाम्यांचक्रथुः — पुत्रकाम्याञ्चक्र / पुत्रकाम्यांचक्र
पुत्रकाम्याञ्चकार / पुत्रकाम्याञ्चकर / पुत्रकाम्यांचकार / पुत्रकाम्यांचकर — पुत्रकाम्याञ्चकृव / पुत्रकाम्यांचकृव — पुत्रकाम्याञ्चकृम / पुत्रकाम्यांचकृम

पुत्रकाम्याम्बभूव / पुत्रकाम्यांबभूव — पुत्रकाम्याम्बभूवतुः / पुत्रकाम्यांबभूवतुः — पुत्रकाम्याम्बभूवुः / पुत्रकाम्यांबभूवुः
पुत्रकाम्याम्बभूविथ / पुत्रकाम्यांबभूविथ — पुत्रकाम्याम्बभूवथुः / पुत्रकाम्यांबभूवथुः — पुत्रकाम्याम्बभूव / पुत्रकाम्यांबभूव
पुत्रकाम्याम्बभूव / पुत्रकाम्यांबभूव — पुत्रकाम्याम्बभूविव / पुत्रकाम्यांबभूविव — पुत्रकाम्याम्बभूविम / पुत्रकाम्यांबभूविम

पुत्रकाम्यामास, पुत्रकाम्यामासतुः, पुत्रकाम्यामासुः ।
पुत्रकाम्यामासिथ, पुत्रकाम्यामासथुः, पुत्रकाम्यामास ।
पुत्रकाम्यामास, पुत्रकाम्यामासिव, पुत्रकाम्यामासिम ॥

आशीः, लिङ्, Benedictive ७.

*पुत्रकाम्यात् / पुत्रकाम्य्यात् — पुत्रकाम्यास्ताम् / पुत्रकाम्य्यास्ताम् — पुत्रकाम्यासुः / पुत्रकाम्य्यासुः
पुत्रकाम्याः / पुत्रकाम्य्याः — पुत्रकाम्यास्तम् / पुत्रकाम्य्यास्तम् — पुत्रकाम्यास्त / पुत्रकाम्य्यास्त
पुत्रकाम्यासम्, / पुत्रकाम्य्यासम्, — पुत्रकाम्यास्व / पुत्रकाम्य्यास्व — पुत्रकाम्यास्म / पुत्रकाम्य्यास्म

श्वस्तनी लुट्, I. Future ८.

पुत्रकाम्यिता, पुत्रकाम्यितारौ, पुत्रकाम्यितारः ।
पुत्रकाम्यितासि, पुत्रकाम्यितास्थः, पुत्रकाम्यितास्थ ।
पुत्रकाम्यितास्मि, पुत्रकाम्यितास्वः, पुत्रकाम्यितास्मः ॥

भविष्यन्ती, लृट्, II. Future ९.

पुत्रकाम्यिष्यति, पुत्रकाम्यिष्यतः, पुत्रकाम्यिष्यन्ति ।
पुत्रकाम्यिष्यसि, पुत्रकाम्यिष्यथः, पुत्रकाम्यिष्यथ ।
पुत्रकाम्यिष्यामि, पुत्रकाम्यिष्यावः, पुत्रकाम्यिष्यामः ।

क्रियातिपत्तिः, लृङ्, Conditional १०.

अपुत्रकाम्यिष्यत्, अपुत्रकाम्यिष्यताम्, अपुत्रकाम्यिष्यन् ।
अपुत्रकाम्यिष्यः, अपुत्रकाम्यिष्यतम्, अपुत्रकाम्यिष्यत ।
अपुत्रकाम्यिष्यम्, अपुत्रकाम्यिष्याव, अपुत्रकाम्यिष्याम ॥

*ननु पुत्रकाम्यादित्यत्राल्लुकः स्थानिवत्त्वेन तद्व्यवधानात् "व्यञ्जनात् पञ्चमान्तस्थायाः स्वरूपे वा।१।३।४७॥ इति कथं यकारलुगिति चेन्न, यविधिसद्भावादत्र स्थानिवद्भावाभावः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इदम्, इमाम्, इमं वेच्छतीति इदंकाम्यति ।

२ इदंकाम्य-धातोरूपाणि ।

१ **इदंकाम्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **इदंकाम्ये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **इदंकाम्य**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ **ऐदंकाम्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **ऐदंकाम्य्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **इदंकाम्या**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **इदंकाम्या** / **इदंकाम्स्या** } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **इदंकाम्यिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **इदंकाम्यिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **ऐदंकाम्यिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

कं, कां, किं वेच्छतीति किंकाम्यति ।

३ किंकाम्य-धातोरूपाणि ।

१ **किंकाम्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **किंकाम्ये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **किंकाम्य**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ **अकिंकाम्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अकिंकाम्य्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **किंकाम्या**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **किंकाम्स्या** / **किंकाम्या** } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **किंकाम्यिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **किंकाम्यिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अकिंकाम्यिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

मान्तादपि काम्यप्रत्ययो भवति, न तु क्यन्वचित्विषिध्यत इति प्रदर्शनार्थं स्वरव्यञ्जनादिभेदेनोदाहरणद्वयम् । तौ सुमो व्यञ्जने स्वौ । १।३।१४ ॥ इति मकारस्थाने पर्यायेणानुस्वारानुनासिकविधानात्, दंका-स्थाने 'दङ्का' इति, किंकास्थाने 'किङ्का' इति च ज्ञेयम् ॥

दोषा रजनिस्तामिच्छतीति दोषाकाम्यति ॥

४ दोषाकाम्य-धातोरूपाणि ॥

१ **दोषाकाम्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **दोषाकाम्ये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **दोषाकाम्य**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥

४ **अदोषाकाम्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अदोषाकाम्य्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **दोषाकाम्या**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **दोषाकाम्स्या** / **दोषाकाम्या** } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **दोषाकाम्यिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **दोषाकाम्यिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अदोषाकाम्यिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अव्ययादपि काम्यप्रत्ययो भवति, न तु क्यन्वचित्विषिध्यत इति प्रदर्शनार्थमुदाहरणम् ।

यश इच्छतीति यशस्काम्यति ॥

५ यशस्काम्य-धातोरूपाणि ॥

१ **यशस्काम्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **यशस्काम्ये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **यशस्काम्य**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ **अयशस्काम्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अयशस्काम्य्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ **यशस्काम्या**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ **यशस्काम्या** / **यशस्काम्स्या** } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **यशस्काम्यिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **यशस्काम्यिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अयशस्काम्यिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

रोः काम्ये ।२।३।७॥ इति सत्वविधिप्रदर्शनार्थमुदाहरणम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सर्पिरिच्छतीति सर्पिष्काम्यति ।

६ सर्पिष्काम्य-धातोरूपाणि ॥

१ सर्पिष्काम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

२ सर्पिष्काम्ये-त, ताम्, युः, :, तम्, त, यम्, व, म॥

३ सर्पिष्काम्य-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥

४ असर्पिष्काम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

५ असर्पिष्काम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व इष्म ॥

६ सर्पिष्काम्या-ञ्चकार इ०॥ म्बभूव इ०॥ मास इ०॥

७ सर्पिष्काम्या, सर्पिष्काम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ सर्पिष्काम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ सर्पिष्काम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

१० असर्पिष्काम्यिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

नामिनस्तयोः षः । २ । ३ । ८ ॥ इति षत्वविधिप्रदर्शनार्थमिदमुदाहरणम् ॥

अहरिच्छतीति अहःकाम्यति ।

७ अहःकाम्य-धातोरूपाणि ॥

१ अहःकाम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

२ अहःकाम्ये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ अहःकाम्य-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ आहःकाम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ आहःकाम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ अहःकाम्या-ञ्चकार इ०॥ म्बभूव इ०॥ मास इ०॥

७ अहःकाम्या, अहःकाम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ अहःकाम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ अहःकाम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

१० आहःकाम्यिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अत्राहन्शब्दनकारस्य रत्वेऽपि रोः सम्बन्धित्वाभावान्न सत्वमिति प्रदर्शनार्थमुदाहृतम् ॥

गिरमिच्छतीति गीःकाम्यति ।

८ गीःकाम्य-धातोरूपाणि ॥

१ गीःकाम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

२ गीःकाम्ये-त्, ताम्, युः, :, तम्, त, म्, व, म ॥

३ गीःकाम्य-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ अगीःकाम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ अगीःकाम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट इषम्, इष्व, इष्म ॥

६ गीःकाम्या-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥

७ गीःकाम्या, गीःकाम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ गीःकाम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ गीःकाम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

१० अगीःकाम्यिष्य-त्, ताम्, न्, :, तम्, त म्, ाव, ाम॥

अत्र रेफस्य रोः सम्बन्धित्वाभावान्न षत्वमपि तु विसर्गः, दीर्घत्वं च भ्वादेरित्यादिना बोध्यम् ॥

श्व इच्छतीति श्वःकाम्यति ।

९ श्वःकाम्य-धातोरूपाणि ॥

१ श्वःकाम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

२ श्वःकाम्ये-त्, ताम्, युः, :, तम्, त, यम्, व, म॥

३ श्वःकाम्य-तु, तात्, ताम्, ", तात्, तम्, त, ानि, ाव, ाम ॥

४ अश्वःकाम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

५ अश्वःकाम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥

६ श्वःकाम्या-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ०॥

७ श्वःकाम्या, श्वःकाम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ श्वःकाम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥

९ श्वःकाम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥

१० अश्वःकाम्यिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

अत्र रस्य रोः सम्बन्धित्वेऽपि अव्ययसम्बन्धित्वान्न सत्वमिति प्रदर्शनार्थमुदाहृतम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

उच्चैरिच्छतीति उच्चैःकाम्यति ।

१० उच्चैःकाम्य–धातोरूपाणि ॥

१ उच्चैःकाम्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
२ उच्चैःकाम्ये–त्, ताम्, युः, :, तम्, त, यम्, व, म॥
३ उच्चैःकाम्य–तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ औच्चैःकाम्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ औच्चैःकाम्य्–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ उच्चैःकाम्या–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ उच्चैःकाम्या, उच्चैःकाम्य्या } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ उच्चैःकाम्यिता–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥
९ उच्चैःकाम्यिष्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
१० औच्चैःकाम्यिष्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

अत्र रेफस्य रोः सम्बन्धित्वेऽप्यव्ययसम्बन्धित्वान्न षत्वमिति प्रदर्शनार्थमुदाहृतम् ॥

स्वरिच्छतीति स्वःकाम्यति ॥

११ स्वःकाम्य–धातोरूपाणि ॥

१ स्वःकाम्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
२ स्वःकाम्ये–त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ स्वःकाम्य–तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अस्वःकाम्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥
५ अस्वःकाम्य्–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ स्वःकाम्या–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ स्वःकाम्या, स्वःकाम्य्या } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म॥
८ स्वःकाम्यिता–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥
९ स्वःकाम्यिष्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
१० अस्वःकाम्यिष्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥

अत्र रेफस्याव्ययसम्बन्धित्वाद् रोः सम्बन्धित्वाभावाच्च न सत्वमिति प्रदर्शनार्थमिदमुदाहृतमिति ॥

विभुमिच्छतीति विभुकाम्यति ।

१२ वि-भुकाम्य–धातोरूपाणि ॥

१ विभुकाम्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
२ विभुकाम्ये–त्, ताम्, युः, :, तम्, त, यम्, व, म॥
३ विभुकाम्य–तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ व्यभुकाम्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ व्यभुकाम्य्–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ विभुकाम्या–ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ विभुकाम्या, विभुकाम्य्या } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ विभुकाम्यिता–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥
९ विभुकाम्यिष्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
१० व्यभुकाम्यिष्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अत्र " न प्रादिरप्रत्ययः ।३।३।४॥ इति वि-रहितस्य धातुत्वेन तदादिवेवाडादिरिति प्रदर्शनार्थमुदाहृतमिदम् ॥

समिधमिच्छतीति समित्काम्यति ।

१३ सम्–इत्काम्य–धातोरूपाणि ॥

१ समित्काम्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः॥
२ समित्काम्ये–त्, ताम्, युः, :, तम्, त, यम्, व, म॥
३ समित्काम्य–तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ समैत्काम्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम॥
५ समैत्काम्य्–ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ समित्काम्या–ञ्चकार इ०॥ म्बभूव इ० ॥ मास इ० ॥
७ समित्काम्या, समित्काम्य्या } –त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ समित्काम्यिता–", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः॥
९ समित्काम्यिष्य–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० समैत्काम्यिष्य–त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अत्र " न प्रादिरप्रत्ययः ।३।३।४॥ इति सम्–रहितस्य धातुत्वेन स्वरादित्वाद्धातोरिकारस्य वृद्धौ ह्यस्तन्यामद्यतन्यां क्रियातिपत्तौ च दर्शितानि रूपाणि भवन्तीति प्रदर्शनार्थमिदमुदाहरणम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

राजानमिच्छतीति राजकाम्यति ॥

१४ राजकाम्य-धातोरूपाणि ॥

१ राजकाम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ राजकाम्ये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ राजकाम्य-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अराजकाम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अराजकाम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ राजकाम्या-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ राजकाम्या } राजकाम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ राजकाम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ राजकाम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अराजकाम्यिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अत्र "नाम्नो नोऽनह्नः ।२।१।९१।। इति नलोपोपदर्शनार्थमुदाहृतम् ॥

वाचमिच्छतीति वाक्काम्यति ।

१५ वाक्काम्य-धातोरूपाणि ॥

१ वाक्काम्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ वाक्काम्ये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ वाक्काम्य-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अवाक्काम्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अवाक्काम्य्-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ वाक्काम्या-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ वाक्काम्या } वाक्काम्य्या } -त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ वाक्काम्यिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ वाक्काम्यिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अवाक्काम्यिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अत्र "चजः कगम् ।२।१।८३। इति चस्य कत्वविधिप्रदर्शनार्थमिदमुदाहरणम् ॥

एवं वाःकाम्य, गोकाम्य, धनकाम्यप्रभृतीनां काम्यप्रत्ययान्तानां नामधातूनां रूपाणि ज्ञेयानि ॥

इति काम्यप्रत्ययान्तप्रकरणम् ॥

इति श्रीमत्तपोगणगगनाङ्गणगगनमणि-सार्वसार्वज्ञशासनसार्वभौम-विद्यापीठादि-प्रस्थानपञ्चकसमाराधक--संविग्नशाखीय-आचार्यचूडामणि--अखण्डविजय-श्रीमद्गुरुराजविजयनेमिसूरीश्वरचरणेन्दिरामन्दिरेन्दिन्दिरायमाणेनान्तेवासिना शास्त्रविशारदेन कविरत्नेन व्याकरणवाचस्पतिना महोपाध्याय-लावण्यविजयगणिना विरचितस्य धातुरत्नाकरस्य नामधातुप्रक्रिया-निरूपणे षष्ठभागे काम्यप्रत्ययान्तनामधातुप्रकरणं सम्पूर्णम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अथ क्यन्प्रत्ययान्तप्रकरणम् ॥

ननु कीदृशान्नाम्नः कस्मिन्कस्मिन्नर्थे 'क्यन्' प्रत्ययो भवतीति चेल्लक्ष्यतामियं पञ्च-लक्षणी ॥ "अमाव्ययात् क्यन् च ॥३।४।२३॥ अमकारान्तादनव्ययाच्च द्वितीयान्तान्नाम्न इच्छायामर्थे क्यन् प्रत्ययो वा भवति काम्यश्च । पुत्रमिच्छति पुत्रीयति । एवं नाव्यति । वाच्यति । चकारः काम्यार्थोऽन्यथा मान्ताव्यययोः सावकाशः स क्यना बाध्येत । अमा-व्ययादितिकिम् ? इदमिच्छति । स्वरिच्छति । गोशब्दसंध्यक्षरवर्जस्वरनान्तेभ्य एव क्यन-मिच्छन्त्यन्ये । गव्यति । पुत्रीयति । राजीयति । अन्यत्र न भवति । यमिच्छति । कमिच्छति । नकारः क्यनि इत्यत्र विशेषणार्थः । ककारः क्यग्रहणे सामान्यग्रहणार्थः ॥

आधाराच्चोपमानादाचारे ॥ ३ । ४ । २४ ॥ अमाव्ययादुपमानभूताद् द्वितीयान्तादा-धाराच्चाचारार्थे क्यन् प्रत्ययो भवति वा । पुत्रमिवाचरति पुत्रीयति छात्रम् । वस्त्रीयति कम्बलम् । पुत्रीयति स्थूलं दर्शनीयं वा । आधारात्—प्रासाद इवाचरति प्रासादीयति कुट्याम् । पर्यङ्कीयति मञ्चके । उपमानादिति किम्, छात्रादेर्मा भूत् । आधाराच्चेति किम्, परशुना दात्रेणेवाचरति । अमाव्ययादिति किम्, इदमिवाचरति । स्वरिवाचरति । उपमानस्य नित्यमुपमेयापेक्षत्वात् सापेक्षत्वेऽप्यसामर्थ्यं न भवति ॥

तपसः क्यन् ॥३ । ४ । ३६॥ तपःशब्दात्कर्मणः करोत्यर्थे क्यन् प्रत्ययो वा भवति । तपःकरोति तपस्यति । अत्र यदा व्रतपर्यायस्तपःशब्दस्तदा क्यन्कर्मणो वृत्तावन्तर्भूतत्वादकर्मक-त्वम्, यदा तु सन्तापक्रियावचनस्तदा क्यन्कर्मणो वृत्तावन्तर्भावेऽपि स्वकर्मणा सकर्मक एव । शत्रूणां तपः करोति तपस्यति शत्रूनिति । यथा व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति ॥

नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ॥३।४।३७॥ नमस्वरिवस्चित्रङ्शब्देभ्यः कर्मभ्यो यथासङ्ख्यं पूजासेवाश्चर्येष्वर्थेषु करोत्यर्थे क्यन्प्रत्ययो वा भवति । देवेभ्यो नमस्करोति नमस्यति देवान् । गुरूणां वरिवः करोति वरिवस्यति गुरून् । चित्रं करोति चित्रीयते । ङकार आत्मनेपदार्थः । अर्चादिष्विति किम् ? नमः करोति, वरिवः करोति । नमोवरिवःशब्द-मुच्चारयतीत्यर्थः । चित्रं करोति । नानात्वमालेख्यं वा करोतीत्यर्थः । ननु च नमस्यति देवा-नित्यत्र नमःशब्दसंयोगनिबन्धना चतुर्थी कस्मान्न भवति । उच्यते । नामधातूनामविवक्षित-प्रकृतिप्रत्ययभेदानां धातुत्वादनर्थकोऽत्र नमः शब्दः । उपपदविभक्तेर्वा कारकविभक्तिर्ब-लीयसी । एवं च नमस्करोति देवानिति वाक्येऽपि द्वितीया सिद्धा । यद्येवं नमस्करोति देवेभ्य इति न भवितव्यम् । नैवम् । करोतेः नमःशब्दसम्बन्धेन देवपदेनासम्बन्धात् । कस्मै इति स्वाकाङ्क्षायां देवेभ्य इति सम्बन्धाच्चतुर्थी सम्प्रदाने वेत्यदोषः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

क्षुत्तृड्गर्धेऽशनायोदन्यधनायम् ॥ ४ । ३ । ११३ ॥ क्षुदादिष्वर्थेषु यथासङ्ख्यमशनायादयः क्यन्नन्ता निपात्यन्ते। क्षुधि गम्यमानायामशनशब्दस्यात्वम्, तृषि गम्यमानायामुदकशब्दस्योदन्नित्ययमादेशः, गर्धे गम्यमाने धनशब्दस्यात्वम्, क्यनि परे निपात्यते। अशनायति। उदन्यति। धनायति। क्षुत्तृड्गर्ध इति किम्? अशनीयति, उदकीयति, धनीयति दानाय ॥

उपादीयतामिदमत्र नवनीतं क्यन्नन्तनामधातुनैपुण्याभिलाषुकैः—

इच्छार्थे, आचारार्थे, करोत्यर्थे च क्यन् प्रत्ययो भवति। तत्रेच्छार्थे मकारान्तवर्जाद् अव्ययवर्जाच्च द्वितीयान्तान्नाम्नः क्यन् प्रत्ययो भवति। यथा पुत्रमिच्छतीति पुत्रीयति। आचारार्थे किल द्वौ प्रकारौ। तथाहि। उपमानभूताद् द्वितीयान्तान्नाम्न आचारार्थे क्यन् प्रत्ययो भवतीत्येकः प्रकारः। यथा पुत्रमिवाचरतीति पुत्रीयति छात्रम्। उपमानभूताद् आधारवाचकात् सप्तम्यन्तान्नाम्न आचारार्थे क्यन् प्रत्ययो भवतीति द्वितीयः प्रकारः। यथा प्रासाद इवाचरतीति प्रासादीयति कुट्याम्। करोत्यर्थेऽपि द्वौ प्रकारौ। तथाहि। सम्भवदर्थमध्यादन्यतरस्मिन्नर्थे विवक्षिते कर्मवाचकान्नाम्नः करोत्यर्थे क्यन् प्रत्ययो भवतीत्याद्यः प्रकारः। यथा तपः करोतीति तपस्यति। अस्मिन् प्रकार एकमेवोदाहरणम्। नानार्थसम्भवेऽपि क्यन्नन्तसमुदायस्यार्थविशेषवृत्तितायामेव कर्मवाचकान्नाम्नः करोत्यर्थे क्यन् प्रत्ययो भवतीति द्वितीयः प्रकारः। यथा अर्चार्थे, देवेभ्यो नमः करोतीति नमस्यति देवान्, सेवार्थे गुरूणां वरिवः करोतीति वरिवस्यति गुरून्, आश्चर्यार्थे चित्रं करोतीति चित्रीयते। अस्मिन् प्रकारे त्रीण्येवोदाहरणानि। एवं च करोत्यर्थे विधीयमानस्य क्यनश्चत्वार एव शब्दा विषया इति ॥ अशनायते, उदन्यते, धनायते, इति निपातनं त्वर्थविशेषे कार्यविशेषार्थं क्यन्प्रत्ययस्तु सामान्यसूत्रेणैव सिद्धः ॥

एवमर्थभेदेन त्रिधा भिद्यमानत्वेन क्यनस्तदन्तधातूनामपि त्रैविध्यात् पूर्वमिच्छाक्यन्नन्तधातूनां रूपाणि निरूप्यन्ते। अत्रापि पूर्वं केवलानां चतुर्दशानां स्वराणां तदनु स्वरान्तानां तदनु व्यञ्जनान्तानाञ्च नाम्नां क्रममाश्रित्य निरूपणा ज्ञेया ॥

अथ प्रस्तुतमनुस्त्रियते ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

१ अं विष्णुम्, अकारं वेच्छतीति
२ आम्, आकारमिच्छतीति
३ इं कामम्, इकारं वेच्छतीति
४ ईं लक्ष्मीम्, ईकारं वेच्छतीति
} ईयति ।

ईय-धातोरूपाणि ॥

१ **ईय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **ईये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **ईय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **ऐय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **ऐय्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, [इष्म ॥
६ **ईया**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ **ईय्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **ईयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **ईयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **ऐयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

क्यनि ॥४।३।११२॥ इत्यनेन अवर्णस्थाने ईकारः । दीर्घश्च्विवयङ्यक्क्येषु ॥ ४ । ३ । १०८ ॥ इत्यनेन ह्रस्वस्थाने दीर्घत्वम् ॥

५ उं शिवम्, उकारं वेच्छतीति
६ ऊं महादेवं चन्द्रं पालकम्, ऊकारं वेच्छतीति
} ऊयति ॥

ऊय-धातोरूपाणि ॥

१ **ऊय**-ति, तः, न्ति सि, थः, थ, ामि, ावः, ामः ॥
२ **ऊये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **ऊय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **औय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **औय्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ **ऊया**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ **ऊय्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **ऊयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **ऊ[illegible]**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **औयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अरम्, ऋकारमिच्छतीति रीयति ॥

७ रीय-धातोरूपाणि ॥

१ **रीय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **रीये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **रीय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अरीय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अरीय्**-ईत्, इष्टाम्, इषुः, ईः, इष्टम्, इष्ट, इषम्, इष्व, इष्म ॥
६ **रीया**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ **रीय्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **रीयिता**-", रौ रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **रीयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अरीयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

ऋतो रीः ॥ ४ । ३ । १०९ ॥ इति ऋकारस्य 'री' इत्यादेशः ॥

ॠम्, ॠकारमिच्छतीति ॠयति ॥

८ ॠय-धातोरूपाणि ॥

१ **ॠय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
तूस्तानि विहन्तीति वितूस्तयति केशान्, विजटीकरोतीत्यर्थः ।

३२ वि-तूस्ति-धातोरूपाणि ॥

१ **वितूस्तय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वितूस्तये**-त्, ताम्, यु, :, तम्, त, यम्, व, म ॥
३ **वितूस्तय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **व्यतूस्तय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **व्यतुतूस्त**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वितूस्तया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वितूस्त्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वितूस्तयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वितूस्तयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **व्यतूस्तयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

तूस्तशब्दो जटायां, संहतकेशेषु, धूलौ, सूक्ष्मे च वर्तते ॥

कृत्यस्य पर्यन्तं करोतीति पर्यन्तयति कृत्यम् ।

३३ परि-अन्ति-धातोरूपाणि ॥

१ **पर्यन्तय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः ामः ॥
२ **पर्यन्तये**-त्, ताम्, यु, :, तम्, त, यम्, व, म ॥
३ **पर्यन्तय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **पर्यान्तय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **पर्यान्तत**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **पर्यन्तया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **पर्यन्त्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **पर्यन्तयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **पर्यन्तयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **पर्यान्तयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

न प्रादिरिति परेर्न धात्ववयवत्वम्-अयतन्याम् अलोपस्य स्थानिवद्भावेन तशब्दस्य द्वित्वे पर्यान्ततत्, स्थानिवद्भावाभावे न्तिशब्दस्य द्वित्वे पर्यान्तितत् ॥

वार्तं नीरोगं करोतीति वार्तयति ।

३४ वार्ति-धातोरूपाणि ॥

१ **वार्तय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वार्तये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **वार्तय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **अवार्तय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अववार्त**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वार्तया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वार्त्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वार्तयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वार्तयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवार्तयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पय एव मया भोक्तव्यमिति व्रतं करोति गृह्णाति वा इति पयो व्रतयति ।

३५ व्रति-धातोरूपाणि ॥

१ **व्रतय**-ति, तः, न्ति, सि, थः, थ, मि, ावः, ामः ॥
२ **व्रतये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **व्रतय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अव्रतय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अवव्रत**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **व्रतया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **व्रत्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **व्रतयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **व्रतयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अव्रतयिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् सन्वत्कार्य्याभावः । सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति गृह्णाति वा सावद्यान्नं व्रतयति ॥

अर्थमाचष्टे करोति वा इति अर्थापयति ।

३६ अर्थापि-धातोरूपाणि ॥

१ **अर्थापय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अर्थापये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **अर्थापय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **आर्थापय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **आर्तिथप**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **अर्थापया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **अर्थाप्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अर्थापयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अर्थापयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **आर्थापयिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

"सत्यार्थवेदस्याः" [३, ४, ४४] इत्याकारे पुसि च अर्थापयति । मतान्तरे ५-आर्तथप-त् । "अर्त्तिरीव्लीह्रीक्नूयिक्ष्माय्यातां पुः ॥ ४-२-२१-इत्यत्र बहुवचनस्य व्याप्त्यर्थत्वेन नाम्नोऽपि पुर्विधानम् । आर्तीथपदित्येके ॥

कृतार्थं करोतीति कृतार्थयति ।

३७ कृतार्थि-धातोरूपाणि ॥

१ **कृतार्थय**-ति, तः, न्ति, सि, थः, थ, मि, ावः, ामः ॥
२ **कृतार्थये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **कृतार्थय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अकृतार्थय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अचकृतार्थ**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **कृतार्थया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **कृतार्थ्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **कृतार्थयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **कृतार्थयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अकृतार्थयिष्य**-त्, ताम्, न्, ः, तम्, त म्, ाव, ाम ॥

वेदमाचष्टे इति वेदापयति ।

३८ वेदापि-धातोरूपाणि ॥

१ **वेदापय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वेदापये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **वेदापय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अवेदापय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अविवेदप**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **वेदापया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वेदाप्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वेदापयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वेदापयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवेदापयिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

"सत्यार्थवेदस्याः" [३-४-४४] इत्याकारे पुसि च वेदापयति ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अन्धं करोतीति अन्धयति।

३९ अन्धि-धातोरूपाणि ॥

१ **अन्धय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अन्धये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **अन्धय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **आन्धय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **आन्दध**-त्, ताम्, न्:, :, तम्, त, म्, ाव, ाम ॥
६ **अन्धया**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ **अन्ध्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अन्धयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अन्धयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **आन्धयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

मतान्तरे ५-आन्दिध-त्। अलोपस्य स्थानिवद्भावेन धशब्दस्य द्वित्वे आन्दधत्-। स्थानिवद्भावाभावे धिशब्दस्य द्वित्वे आन्दिधत् ॥

गन्धेनार्चयति गन्धयति।

४० गन्धि-धातोरूपाणि ॥

१ **गन्धय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **गन्धये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **गन्धय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **अगन्धय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अजगन्ध**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **गन्धया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **गन्ध्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **गन्धयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **गन्धयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अगन्धयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

वृद्धमाचष्टे करोति वा इति वर्षयति, ज्ययति।

४१ वर्षि-धातोरूपाणि ॥

१ **वर्षय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वर्षये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **वर्षय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अवर्षय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अववर्ष**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वर्षया**-ञ्चकार इ० ॥ म्बभूव इ० ॥ मास इ० ॥
७ **वर्ष्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वर्षयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वर्षयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवर्षयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

वृद्धशब्दस्य "प्रियस्थिर०" [७, ४, ३८] इति वर्ष इत्यादेशः। "वृद्धस्य च ज्यः" [७, ४, ३५] इति ज्य आदेशश्च ॥

४१ ज्यि-धातोरूपाणि ॥

१ **ज्यय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **ज्यये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **ज्यय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **अज्यय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अजज्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **ज्यया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **ज्याया**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **ज्ययिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **ज्ययिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अज्ययिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

मतान्तरे अजिज्यत्। परोक्षायाम्-ज्य णि णव इति स्थिते णेरयादेशे अनेस्वरत्वात् परोक्षाया आम् इत्यादेशे परोक्षान्तः कृभ्वस्त्यनुयोगः। पूर्वम् अकारलोपेऽपि स्थानिवद्भावेन अनेकस्वरत्वमबाधितमेव ॥ आशिषि णिरूपनिमित्तापाये अकारलोपस्याप्यभावात् अकारसद्भावे दीर्घे ज्यायात्-अलोपानिवृत्तौ तु ज्यात् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

दृष्टचरस्य चिह्नं करोतीति चिह्नयति दृष्टचरम् ।

४२ चिह्न–धातोरूपाणि ॥

१ **चिह्नय**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **चिह्नये**–त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **चिह्नय**–तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अचिह्नय**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अचिचिह्न**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **चिह्नया**–ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **चिह्न्या**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **चिह्नयिता**–'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **चिह्नयिष्य**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अचिह्नयिष्य**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

अल्पमाचष्टे इति अल्पयति, कनयति ।

४३ अल्पि–धातोरूपाणि ॥

१ **अल्पय**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अल्पये**–त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **अल्पय**–तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **आल्पय**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **आलल्प**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **अल्पया**–ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **अल्प्या**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अल्पयिता**–'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अल्पयिष्य**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **आल्पयिष्य**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

अद्यतन्याम् अलोपस्य स्थानिवद्भावेन ल्पशब्दस्य द्वित्वे आलल्पत्, स्थानिवद्भावाभावे तु लिपशब्दस्य द्वित्वे आलिल्पत् ॥

४३ कनि–धातोरूपाणि ॥

१ **कनय**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **कनये**–त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **कनय**–तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अकनय**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अचीकन**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **कनया**–ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **कन्या**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **कनयिता**–'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **कनयिष्य**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अकनयिष्य**–त्, ताम्, न्, ः, तम्, त, म्, ावं, ाम ॥

" अल्पयूनोः कन्वाः " [७, ४, ३३] इति अल्पशब्दस्य वा कन् इत्यादेशः ।

रूपं निध्यायतीति निरूपयति ।

४४ नि–रूपि–धातोरूपाणि ॥

१ **निरूपय**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **निरूपये**–त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **निरूपय**–तु, तात्, ताम्, न्तु, ', तात्, तम्, त, ाणि, ाव, ाम ॥
४ **न्यरूपय**–त, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **न्यरुरूप**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **निरूपया**–ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **निरूप्या**–त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **निरूपयिता**–'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **निरूपयिष्य**–ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **न्यरूपयिष्य**–त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

न प्रादिरिति नेर्धात्वनवयवत्वात् रूपि इत्यस्यादौ अड्विधिः ॥ अद्यतन्याम् समानलोपित्वात् उपाऽन्त्यह्रस्वाभावः सन्वत्कार्याभावश्च ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुष्पैरर्चयतीति पुष्पयति ।

४५ पुष्पि-धातोरूपाणि ॥

१ **पुष्पय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **पुष्पये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **पुष्पय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अपुष्पय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अपुपुष्प**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **पुष्पया**-ञ्चकार, इ० ॥ **म्बभूव, इ०** ॥ मास, इ० ॥
७ **पुष्प्या**-त्, **स्ताम्, सुः, :, स्तम्**, स्त, **सम्**, स्व, स्म ॥
८ **पुष्पयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **पुष्पयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अपुष्पयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

रूपं दर्शयति, मतान्तरे पश्यतीति रूपयति ।

४६ रूपि-धातोरूपाणि ॥

१ **रूपय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **रूपये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **रूपय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अरूपय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अरुरूप**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **रूपया**-ञ्चकार, इ० ॥ **म्बभूव, इ०** ॥ मास, इ० ॥
७ **रूप्या**-त्, **स्ताम्, सुः, :, स्तम्**, स्त, सम्, स्व, स्म ॥
८ **रूपयिता**-", **रौ**, रः, सि, स्थः, स्थ, स्मि, **स्वः, स्मः** ॥
९ **रूपयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अरूपयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

रूपशब्दः स्वभावे, सौन्दर्ये, शुक्लादिवर्णे, तद्वति च वर्तते । अद्यतन्याम् समानलोपित्वात् उपाऽन्त्यह्रस्वाभावः सन्वत्कार्य्याभावश्च ॥

अर्यमाचष्टे इति अर्ययति ।

४७ अर्यि-धातोरूपाणि ॥

१ **अर्यय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अर्यये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **अर्यय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **आर्यय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **आरर्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **अर्यया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **अर्य्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अर्ययिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अर्ययिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **आर्ययिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अर्यः स्वामी वैश्यो वा आरर्यत् अत्र "स्वरादेः०" [४, १, ४] इति र्यद्वित्वे कार्ये स्थानि-निमित्तापक्षयापि प्राग्विधिरिष्यते ॥

प्रियमाचष्टे करोति वा इति प्रापयति ।

४८ प्रापि-धातोरूपाणि ॥

१ **प्रापय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **प्रापये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **प्रापय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अप्रापय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अपिप्रप**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **प्रापया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **प्राप्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **प्रापयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **प्रापयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अप्रापयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"प्रियस्थिर०" [७, ४, ३८] इति प्रियशब्दस्य प्रा इत्यादेशः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

४९ ज्यि-धातोरूपाणि ॥

१ **ज्यय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **ज्ययं**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **ज्यय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अज्यय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अजिज्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **ज्यया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **ज्याया**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **ज्ययिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **ज्ययिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अज्ययिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

५ अजज्यत् इत्यपरे। "प्रशस्यस्य श्रः" [७, ४, ३४] इति "वृद्धस्य च ज्य" [७, ४, ३५] इति च क्रमेण इति ज्य श्र इति चादेशौ भवतः ॥

प्रशस्यमाचष्टे करोति वा इति श्रयति, ज्ययति ॥

४९ श्रि-धातोरूपाणि ॥

१ **श्रय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **श्रये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **श्रय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव ाम ॥
४ **अश्रय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अशिश्र**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **श्रया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **श्राया**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **श्रयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **श्रयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अश्रयिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

५ अशश्रत् इत्यपरे। आशिषि णिलोपनिमित्तापाये अकारलोपस्याप्यपायात् अकारसद्भावे दीर्घे च श्रायात् अकारलोपानिवृत्तौ तु श्र्यात् ॥

सत्यं करोति आचष्टे वा इति सत्यापयति।

५० सत्यापि-धातोरूपाणि ॥

१ **सत्यापय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **सत्यापये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **सत्यापय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **असत्यापय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **अससत्यप**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ **सत्यापया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **सत्याप्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्वः, स्मः ॥
८ **सत्यापयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **सत्यापयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **असत्यापयिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

"सत्यार्थवेदस्याः" [३, ४, ४४] इत्याकारे पुकि च सत्यापयति।

५-अससत्यपत्, असतित्यपत्, ओणेर्ऋदित्करणज्ञापकात्, पूर्वमुपान्त्यह्रस्वे पश्चाद्द्वित्वे, असत्यपिपत्।

४९ प्र-शस्यि-धातोरूपाणि ॥

१ **प्रशस्यय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **प्रशस्यये**-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ **प्रशस्यय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **प्राशस्यय**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ **प्राशशस्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव ाम ॥
६ **प्रशस्यया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **प्रशस्या**-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ **प्रशस्ययिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **प्रशस्ययिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **प्राशस्ययिष्य**-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

मतान्तरे प्रशस्यशब्दस्य णावादेशो न भवतीति प्रशस्ययति ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्वतरमाचष्टे तेनातिक्रामति वा इति अश्वयति ।

५१ अश्वि-धातोरूपाणि ॥

१ अश्वय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ अश्वये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ अश्वय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ आश्वय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ आशश्व-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ अश्वया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ अश्व्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ अश्वयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ अश्वयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० आश्वयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अद्यतन्याम् अलोपस्य स्थानिवद्भावेन श्वशब्दस्य द्वित्वे आशश्वत्—

स्थानिवद्भावाभावे तु श्विशब्दस्य द्वित्वे-आशिश्वत् ॥

क्षिप्रमाचष्टे करोति वा इति क्षेपयति ।

५२ क्षेपि-धातोरूपाणि ॥

१ क्षेपय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ क्षेपये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ क्षेपय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ अक्षेपय-त्, ताम्, न्, :, तम्, त म्, ाव, ाम ॥
५ अचिक्षेप-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ क्षेपया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ क्षेप्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ क्षेपयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ क्षेपयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अक्षेपयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् ह्रस्वाभावः सन्वत्कार्याभावश्च "स्थूलदूर०" [७, ४, ४२] इत्यन्तस्थादेरंशस्य रशब्दस्य लुग् नामिनो गुणश्च ॥

क्षुद्रमाचष्टे करोति वा इति क्षोदयति ।

५३ क्षोदि-धातोरूपाणि ॥

१ क्षोदय-ति, त, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ क्षोदये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ क्षोदय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ अक्षोदय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अचुक्षोद-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ क्षोदया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ क्षोद्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ क्षोदयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ क्षोदयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अक्षोदयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

" स्थूलदूर० " [७, ४, ४२] इत्यस्थादेरंशस्य लुग्नामिनो गुणश्च । समानलोपित्वात् उपान्त्यह्रस्वः सन्वत्कार्यं च न भवति ॥

चिरमाचष्टे विलम्बते वा इति चिरयति ।

५४ चिरि-धातोरूपाणि ॥

१ चिरय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ चिरये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ चिरय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ अचिरय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अचिचिर-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ चिरया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ चिर्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ चिरयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ चिरयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अचिरयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् सन्वत्कार्याभावः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

छिद्रं करोतीति छिद्रयति ।

५५ छिद्रि-धातोरूपाणि ॥

१ छिद्रय-ति, त, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ छिद्रये-त्, ताम्, यु, :, तम्, त, यम्, व, म ॥
३ छिद्रय-तु तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ अच्छिद्रय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अचिच्छिद्र-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ छिद्रया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ छिद्र्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ छिद्रयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ छिद्रयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अछिद्रयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

तृप्रमाचष्टे करोति वा इति त्रपयति ।

५६ त्रपि--धातोरूपाणि ॥

१ त्रपय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ त्रपये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ त्रपय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ अत्रपय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अतित्रप-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ त्रपया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ त्रप्या-त, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ त्रपयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ त्रपयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अत्रपयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"प्रियस्थिर०" [७, ४, ३८] इति त्रप् आदेशः। असमानलोपित्वात् सन्वद्भावे अतित्रपत्, लघुत्वाभावाच्च दीर्घत्वम्। मतान्तरे त्रापयतीत्यादि। तृप्रशब्दो मेधान्त-धर्मे, आज्ये, काष्ठे, पापे, दुःखे च वर्तते ॥

दूरमाचष्टे करोति वा इति दवयति ।

५७ दवि-धातोरूपाणि ॥

१ दवय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ दवये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ दवय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अदवय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अदुदव-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ दवया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ दव्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ दवयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ दवयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अदवयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"स्थूलदूर०" [७, ४, ४२] इति अन्तस्थादेर्लुकि नामिनो गुणे च दवयति। णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवतीति न्यायेन दूशब्दस्य द्वित्वे अदुदवत्। केचित्तु स्थूलदूरयूनां करोत्यर्थे णावन्तस्थादेर्लुकं नामिनो गुणं च नेच्छन्ति स्थूलं करोति स्थूलयति। दूरयति। यूवयति।

वस्त्रं परिदधातीति परिवस्त्रयति ।

५८ परि-वस्त्रि-धातोरूपाणि ॥

१ परिवस्त्रय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ परिवस्त्रये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ परिवस्त्रय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ पर्यवस्त्रय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ पर्यववस्त्र-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ परिवस्त्रया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ परिवस्त्र्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ परिवस्त्रयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ परिवस्त्रयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० पर्यवस्त्रयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादिः" इति परेर्न धात्ववयवत्वम् ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पुत्रं सूते इति पुत्रयति ।

५९ पुत्रि-धातोरूपाणि ॥

१ **पुत्रय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **पुत्रये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **पुत्रय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अपुत्रय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अपुपुत्र**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **पुत्रया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **पुत्र्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व:, स्मः ॥
८ **पुत्रयिता**-'', रौ, रः, सि, थः, थ, स्मि, स्वः, स्मः ॥
९ **पुत्रयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अपुत्रयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

मिश्रं करोतीति मिश्रयत्योदनम् ।

६० मिश्र-धातोरूपाणि ॥

१ **मिश्रय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **मिश्रये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **मिश्रय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अमिश्रय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अमिमिश्र**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **मिश्रया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **मिश्र्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **मिश्रयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **मिश्रयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अमिश्रयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

अमिश्रं मिश्रं करोतीति मिश्रयतीत्यादि च्व्यर्थे एवेति कश्चित् ।

वीर उत्सहते वीरयति ।

६१ वीरि-धातोरूपाणि ॥

१ **वीरय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वीरये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **वीरय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अवीरय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अविवीर**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वीरया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वीर्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वीरयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वीरयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवीरयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

शूरो भवतीति शूरयति ।

६२ शूरि-धातोरूपाणि ॥

१ **शूरय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **शूरये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **शूरय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अशूरय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अशुशूर**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **शूरया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **शूर्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **शूरयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **शूरयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अशूरयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ अशुशूरत्-अत्र समानलोपित्वान्न सन्वद्भावः ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वस्त्रं वस्त्रेण वा समाच्छादयतीति संवस्त्रयति ।

६३ सम्-वस्त्रि-धातोरूपाणि ॥

१ संवस्त्रय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ संवस्त्रये-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ संवस्त्रय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ समवस्त्रय-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ समववस्त्र-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ संवस्त्रया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ संवस्त्र्या-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ संवस्त्रयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ संवस्त्रयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० समवस्त्रयिष्य-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

"न प्रादिः०" इति समो न धात्ववयत्वम् ॥

व्याकरणस्य सूत्रं करोतीति व्याकरणं सूत्रयति ।

६४ सूत्रि-धातोरूपाणि ॥

१ सूत्रय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ सूत्रये-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ सूत्रय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ाणि, ाव, ाम ॥
४ असूत्रय-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ असुसूत्र-त्, ताम्, न्, ः, तम्, म्, ाव, ाम ॥
६ सूत्रया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ सूत्र्या-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ सूत्रयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ सूत्रयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० असूत्रयिष्य-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

सूत्रव्याकरणयोः सम्बन्धस्य उत्पन्ने प्रत्यये निवर्तनात् सूत्रयतिक्रियासम्बन्धाच्च व्याकरणशब्दाद् द्वितीयैव, एवमन्यत्रापि ॥

स्थिरमाचष्टे करोती वा इति स्थापयति ।

६५ स्थापि-धातोरूपाणि ॥

१ स्थापय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ स्थापये-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ स्थापय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ अस्थापय-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ अतिष्ठप-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ स्थापया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ स्थाप्या-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ स्थापयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ स्थापयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अस्थापयिष्य-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

मतान्तरे अतिस्थप-त्, "प्रियस्थिर०" [७, ४, ३८] इति स्थिरशब्दस्य स्था इत्यादेशः । पुसि सन्वद्भावे च 'अतिष्ठपत्' लघुत्वाभावान्न दीर्घत्वम् ॥

स्फिरमाचष्टे करोति वा इति स्फापयति ।

६६ स्फापि-धातोरूपाणि ॥

१ स्फापय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ स्फापये-त्, ताम्, युः, ः, तम्, त, यम्, व, म ॥
३ स्फापय-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ अस्फापय-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
५ अपिस्फप-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥
६ स्फापया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ स्फाप्या-त्, स्ताम्, सुः, ः, स्तम्, स्त, सम्, स्व, स्म ॥
८ स्फापयिता-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ स्फापयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अस्फापयिष्य-त्, ताम्, न्, ः, तम्, त, म्, ाव, ाम ॥

मतान्तरे "प्रियस्थिर०" [७, ४, ३८] इति स्फा आदेशे पुसि च स्फापयति, पुसि सन्वद्भावे च 'अपिस्फपत्' लघुत्वाभावान्न दीर्घत्वम् अपिस्फपत् । स्फिरशब्दः प्रचुरे, वृद्धे, वृद्धौ च वर्तते ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

६७ अनु-तुलि-धातोरूपाणि ॥

१ **अनुतूलय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **अनुतूलये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **अनुतूलय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥

४ **अन्वतूलय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अन्वतुतूल**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

६ **अनुतूलया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥

७ **अनुतूल्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **अनुतूलयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **अनुतूलयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अन्वतूलयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादिः०" इति अनोर्न धात्ववयवत्वम् । समानलोपित्वाद् ह्रस्वाभावः सन्वत्कार्याभावश्च । तूलैरनुकुष्णाति अवकुष्णाति, अनुगृह्णातीत्यनुतूलयति । अवतूलयति । अनुकुष्णात्यवकुष्णात्योः साधारणोऽर्थोऽनुगृह्णातीति अनुतूलयतीत्यस्य तूलैः कृत्वा अनुकूलं यथा भवति एवमन्तरवयवान् बहिर्निःसारयतीत्यर्थः ॥

कूलमुल्लङ्घयतीति उत्कूलयति ।

६८ उद्-कूलि-धातोरूपाणि ॥

१ **उत्कूलय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **उत्कूलये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **उत्कूलय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥

४ **उदकूलय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **उदचुकूल**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

६ **उत्कूलया**-ञ्चकार, इ० ॥ म्बभूव इ० ॥ मास, इ० ॥

७ **उत्कूल्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **उत्कूलयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **उत्कूलयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **उदकूलयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

" न प्रादिः०" इति उदो न धात्ववयवत्वम्, समानलोपित्वात् ह्रस्वाभावः सन्वत्कार्याभावश्च । कूलं प्रतीपं गच्छतीति प्रतिकूलयति कूलमनुगच्छतीति अनुकूलयति ॥

कुशलं करोतीति कुशलयति ।

६९ कुशलि-धातोरूपाणि ॥

१ **कुशलय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **कुशलये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **कुशलय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥

४ **अकुशलय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अचुकुशल**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

६ **कुशलया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥

७ **कुशल्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **कुशलयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **कुशलयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अकुशलयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् सन्वत्कार्याभावः ॥

बलेन सहते इति बलयति ।

७० बलि-धातोरूपाणि ॥

१ **बलय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

२ **बलये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥

३ **बलय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥

४ **अबलय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

५ **अबबल**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

६ **बलया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥

७ **बल्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥

८ **बलयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥

९ **बलयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥

१० **अबलयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् सन्वत्कार्याभावः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

बहुलमाचष्टे करोति वा इति वंहयति ।

७१ वंहि-धातोरूपाणि ॥

१ **वंहय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वंहये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **वंहय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अवंहय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अववंह**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वंहया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वंह्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वंहयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वंहयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवंहयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"प्रियस्थिर०" [७, ४, ३८] इति वंह आदेशः ॥

शीलेनाचरतीति शीलयति ।

७२ शीलि-धातोरूपाणि ॥

१ **शीलय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **शीलये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **शीलय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अशीलय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अशिशील**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **शीलया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **शील्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **शीलयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **शीलयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अशीलयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

समानलोपित्वात् उपान्त्यह्रस्वाभावः सन्वल्कार्याभावश्च ॥

स्थूलमाचष्टे करोति वा इति स्थवयति ।

७३ स्थवि-धातोरूपाणि ॥

१ **स्थवय**-ति, तः, न्ति, सि, थः, थ, ामि, वः, ामः ॥
२ **स्थवये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **स्थवय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अस्थवय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अतुस्थव**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **स्थवया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **स्थव्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **स्थवयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **स्थवयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अस्थवयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"स्थूलदूर०" [७, ४, ४२] इति अन्तस्थादेरंशस्य लुग् नामिनश्च गुणः । णौ यत्कृतमितिन्यायेन स्थूलशब्दस्य द्वित्वादिके अतुस्थवत् ॥

अश्वेनातिक्रामतीति अत्यश्वयति ।

७४ अति-अश्वि-धातोरूपाणि ॥

१ **अत्यश्वय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अत्यश्वये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **अत्याश्वय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अत्यश्वय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अत्याशश्व**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **अत्यश्वया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **अत्यश्व्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अत्यश्वयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अत्यश्वयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अत्याश्वयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादिः०" इति अतेर्न धात्ववयवत्वम्, अथतन्याम्-अलोपस्य स्थानिवद्भावेन श्वशब्दस्य द्विर्भावादिके अत्याशश्वत्, तदनङ्गीकारे अत्याशिश्वत् ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

अश्वेन संयुनक्तीति समश्वयति।

७५ सम्-अश्वि-धातोरूपाणि ॥

१ **समश्वय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **समश्वये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **समश्वय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **समाश्वय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **समाशश्व**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **समश्वया**-ञ्चकार, इ०॥ म्बभूव, इ०॥ मास, इ०॥
७ **समश्व्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **समश्वयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **समश्वयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **समाश्वयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादिः०" इति समो न धात्ववयवत्वम्। अद्यतन्याम् अलोपस्य स्थानिवद्भावेन श्वशब्दस्य द्वित्वादिके समाशश्वत् तदनङ्गीकारे समाशिश्वत् ॥

ह्रस्वमाचष्टे करोति वा इति ह्रसयति।

७६ ह्रसि-धातोरूपाणि ॥

१ **ह्रसय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **ह्रसये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **ह्रसय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अह्रसय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अजह्रस**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **ह्रसया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **ह्रस्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **ह्रसयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **ह्रसयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अह्रसयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"स्थूलदूर०" [७, ४, ४२] इत्यन्तस्थादेरंशस्य लुग्। समानलोपित्वात् सन्वत्कार्य्याभावः ॥

कृशं तनुमाचष्टे करोति वा इति क्रशयति।

७७ क्रशि-धातोरूपाणि ॥

१ **क्रशय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **क्रशये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **क्रशय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अक्रशय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अचक्रश**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **क्रशया**-ञ्चकार, इ०॥ म्बभूव, इ० ॥ मास, इ०॥
७ **क्रश्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **क्रशयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **क्रशयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अक्रशयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"पृथुमृदु०" [७, ४, ३९] इति ऋकारस्य रः। समानलोपित्वात् सन्वत्कार्य्याभावः।

भृशमतिशयवन्तमाचष्टे करोति वा इति भ्रशयति।

७८ भ्रशि-धातोरूपाणि ॥

१ **भ्रशय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **भ्रशये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **भ्रशय**-तु, तात्, ताम्, न्तु, '', तात्, तम्, त, ानि, ाव, ाम ॥
४ **अभ्रशय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अबभ्रश**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **भ्रशया**-ञ्चकार, इ०॥ म्बभूव, इ०॥ मास, इ०॥
७ **भ्रश्या** त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **भ्रशयिता**-'', रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **भ्रशयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अभ्रशयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"पृथुमृदु०" [७, ४, ३९] इति ऋकारस्य रः। समानलोपित्वात् सन्वत्कार्य्याभावः।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पाशं पाशाद्वा विमोचयतीति विपाशयति ।

७९ वि-पाशि-धातोरूपाणि ॥

१ **विपाशय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **विपाशये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **विपाशय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **व्यपाशय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **व्यपपाश**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **विपाशया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **विपाश्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **विपाशयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **विपाशयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **व्यपाशयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादि:०" इति वेर्न धात्ववयवत्वम् । समानलोपित्वात् ह्रस्वाभावः सन्वत्कार्य्याभावश्च ॥

पाशेन संयच्छतीति संपाशयति ।

८० सम्-पाशि-धातोरूपाणि ॥

१ **संपाशय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **संपाशये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **संपाशय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **समपाशय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **समपपाश**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **संपाशया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **संपाश्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **संपाशयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **संपाशयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **समपाशयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादि०" इति न समो धात्ववयवत्वम् । समानलोपित्वात् ह्रस्वाभावः सन्वत्कार्य्याभावश्च ।

वृक्षमाचष्टे रोपयति वा इति वृक्षयति ।

८१ वृक्षि-धातोरूपाणि ॥

१ **वृक्षय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **वृक्षये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **वृक्षय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ाणि, ाव, ाम ॥
४ **अवृक्षय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अववृक्ष**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **वृक्षया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **वृक्ष्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **वृक्षयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **वृक्षयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अवृक्षयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

सेनया अभियातीति अभिषेणयति ।

८२ अभि-षेणि-धातोरूपाणि ॥

१ **अभिषेणय**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ **अभिषेणये**-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ **अभिषेणय**-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ **अभ्यषेणय**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ **अभ्यषिषेण**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ **अभिषेणया**-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ **अभिषेण्या**-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ **अभिषेणयिता**-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ **अभिषेणयिष्य**-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० **अभ्यषेणयिष्य**-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"त्र्यन्त्यस्वरादेः" [७, ४, ३३] इत्यन्त्यस्वरलोपः, समानलोपित्वाच्च उपान्त्य ह्रस्वाभावः सन्वत्कार्य्याभावश्च ।

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वीणयोपगायतीति उपवीणयति ।

८३ उप-वीणि-धातोरूपाणि ॥

१ उपवीणय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ उपवीणये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ उपवीणय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ उपावीणय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ उपाविवीण-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ उपवीणया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ उपवीण्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ उपवीणयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ उपवीणयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० उपावीणयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"न प्रादिरप्रत्ययः" [३, ३, ४] इति उपसर्गस्य न धात्ववयवत्वम् । समानलोपित्वात् उपाऽन्त्यह्रस्वाभावः सन्वत्कार्य्याभावश्च ॥

दारुणः खट्वां करोतीति खट्वयति दारु ।

८४ खट्वि-धातोरूपाणि ॥

१ खट्वय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ खट्वये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ खट्वय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अखट्वय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अचखट्व-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ खट्वया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ खट्व्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ खट्वयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ खट्वयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अखट्वयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

तुलां रोपयतीति तुलयति कनकम् ।

८५ तुलि-धातोरूपाणि ॥

१ तुलय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ तुलये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ तुलय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अतुलय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अतुतुल-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ तुलया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ तुल्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ तुलयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ तुलयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अतुलयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"त्र्यन्त्यस्वरादेः" [७, ४, ४३] इत्यन्त्यस्वरादिलोपः समानलोपित्वाच्च ह्रस्वाभावः सन्वत्कार्य्याभावश्च ॥

असिना छिनत्तीति असयति ।

८६ असि-धातोरूपाणि ॥

१ असय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ असये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ असय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव ाम ॥
४ आसय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ आसिस-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ असया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ अस्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ असयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ असयिष्य-ति, तः, न्ति. सि, थः, थ, ामि, ावः, ामः ॥
१० आसयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इं काममाचष्टे इति। आययति।

८७ आयि-धातोरूपाणि ॥

१ आयय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ आययेत्-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ आयय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ आयय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ आयिय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ आयया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ आय्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ आययिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ आययिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० आययिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

मतान्तरे ५ आयय-त्। "नामिनोऽकलिहलेः" इत्यत्र कलिहलिवर्जनान्नाम्नोऽपि वृद्धिः ॥

कलिं गृह्णातीति कलयति।

८८ कलि-धातोरूपाणि ॥

१ कलय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ कलये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ कलय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अकलय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अचकल-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ कलया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ कल्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ कलयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ कलयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अकलयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"नामिनोऽकलि०" [४, ३, ५१] इत्यत्र कलिवर्जनान्न वृद्धिः। एवं समानलोपित्वान्न सन्वत्कार्यम्। कलिशब्दो बिभीतकवृक्षे विवादे युद्धे शूरे अन्त्ययुगे कोरके च वर्तते ॥

वास्या कुठारविशेषेण छिनत्तीति वासयति।

८९ वासि-धातोरूपाणि ॥

१ वासय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ वासये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ वासय-तु, तात्, ताम्, न्तु, ", तात्, तम्, त, ानि, ाव, ाम ॥
४ अवासय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अवीवस-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ वासया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ वास्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ वासयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
९ वासयिष्य-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
१० अवासयिष्य-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥

"नामिनोऽकलि०" [४, ३, ५१] अत्र कलिहलिवर्जनान्नाम्नोऽपि वृद्धयां पश्चाल्लोपे उपान्त्यह्रस्वे सन्वत्कार्ये सति अवीवसत्। स्वरस्येति स्थानिवद्भावो न तस्यानित्यत्वात् मतान्तरे ५ अववास-त् ॥

हलिं महद्धलं गृह्णातीति हलयति।

९० हलि-धातोरूपाणि ॥

१ हलय-ति, तः, न्ति, सि, थः, थ, ामि, ावः, ामः ॥
२ हलये-त्, ताम्, युः, :, तम्, त, यम्, व, म ॥
३ हलय-तु, तात् ताम्, न्तु, ", तात्, तम्, त, ानि ाव, ाम ॥
४ अहलय-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
५ अजहल-त्, ताम्, न्, :, तम्, त, म्, ाव, ाम ॥
६ हलया-ञ्चकार, इ० ॥ म्बभूव, इ० ॥ मास, इ० ॥
७ हल्या-त्, स्ताम्, सुः, :, स्तम्, स्त, सम्, स्व, स्म ॥
८ हलयिता-", रौ, रः, सि, स्थः, स्थ, स्मि, स्वः, स्मः ॥
